ऋतम्

ṚTAM

JOURNAL
OF
Akhila Bharatiya Sanskrit Parishad

Volume I | January 1970 | No. II

Mahatma Gandhi Marg, Hazratganj
LUCKNOW

Price (exclusive of Postage)

	Current Volume	Back Volumes	Single Number
भारत	रु० २०.००	रु० २५.००	रु० १२.००
India	Rs. 20.00	Rs. 25.00	Rs. 12.00
U. S. A.	$ 5.00	$ 6.25	$ 3.00
Sterling	£ 2.00	£ 2.10 Sh.	£ 1.5 Sh.

ऋतम्

ṚTAM

JOURNAL
OF

Akhila Bharatiya Sanskrit Parishad

Volume I | January 1970 | No. II

Mahatma Gandhi Marg, Hazratganj
LUCKNOW

CONTENTS

VOL. I JANUARY 1970 No. II

अनुक्रम

I. लेख (Articles)

तत्रभवद्भर्तृहर्यभिप्रेतं साधनस्वरूपम्

को. अ. सुब्रह्मण्य अय्यर्

(१) महावैयाकरणस् तत्रभवान् भर्तृहरिः शब्दाद्वैतस्य प्रवर्तकत्वेन प्रसिद्धिं गतः। तदिदं दर्शनं तद्विरचिते वाक्यपदीये विस्तरेण प्रतिपादितं दृश्यते। शब्दाद्वैतदर्शनानुसारेण यदिदं जगतो मूलकारणं ब्रह्म तच्छब्दतत्त्वम् इत्य् आदौ प्रतिज्ञायते। इदं शब्दतत्त्वं ब्रह्म यद्य् अप्य् एकम् अभिन्नं च तथाप्य् अस्मिन् सर्वबीजे ब्रह्मणि सन्त्य् असंख्याः शक्तयो याभिर् ब्रह्मणो भोक्तृभोक्तव्यभोगरूपेण स्थितिर् लोकव्यवहारार्थं प्रवर्तते। तदुक्तं भर्तृहरिणा

एकम् एव यद् आम्नातं भिन्नं शक्तिव्यपाश्रयात्।
अपृथक्त्वेऽपि शक्तिभ्यः पृथक्त्वेनेव वर्तते॥
एकस्य सर्वबीजस्य यस्य चेयम् अनेकधा।
भोक्तृभोक्तव्यरूपेण भोगरूपेण च स्थितिः॥[१]

इति। अस्मादेव वचनात् प्रतीयते यद् भर्तृहरेर्विचारपद्धतौ शक्तितत्त्वस्य महत्त्वं भवतीति। शक्तिशक्तिमतोर् अभेद इत्य् अपि भर्तृहरेर् अभ्युपगमः। अत एवाभिन्नस्य शब्दतत्त्वस्य ब्रह्मणः शक्तिर् अप्य् अभिन्ना। यद्य् अप्य् अयम् एव परमार्थस् तथापि शक्तीनां नानात्वम् अपि स्वीक्रियते भर्तृहरिणा। अस्य जगतो यद् इदं महद् वैचित्र्यं तद्रूपस्य कार्यनानात्वस्योपपादनार्थं शक्तिवैचित्र्यं समुन्नीयते। अत एव शक्तिविषये बहुत्र बहुवचनप्रयोगो दृश्यते वाक्यपदीये। वैशेषिकसांख्यादिभिर् ये पदार्थाः स्वीकृता द्रव्यगुणकर्मसामान्यादयस् तेषां सर्वेषामपि भर्तृहरिदर्शनेऽभिन्नस्य ब्रह्मणः शक्तित्वमेव। यदुक्तम्—

तस्माद् द्रव्यादयः सर्वाः शक्तयो भिन्नलक्षणाः।
संसृष्टाः पुरुषार्थस्य साधिका न तु केवलाः॥[२]

(२) इति। शक्तीनां बह्वीनां सतीनां न समं प्राधान्यम्। कासाञ्चिच्छक्तीनां विशेषतः समुल्लेखो दृश्यते वाक्यपदीये। शक्तिषु कालशक्तिरेव मूर्धाभिषिक्तेत्य् अत्र नास्ति कोऽपि संदेहः। ग्रन्थारम्भ एवोक्तं भर्तृहरिणा—

अध्याहितकलां यस्य कालशक्तिम् उपाश्रिताः।
जन्मादयो विकाराः षड् भावभेदस्य योनयः॥[३]

इति। कालशक्तिरेव स्वातन्त्र्यम् इति व्यपदिष्टा भर्तृहरेः स्वोपज्ञत्वेन प्रसिद्धायां प्राचीनवृत्तौ[४]। बहुत्र वाक्यपदीयतृतीयकाण्डव्याख्याकृता हेलाराजेन कालाख्या स्वातन्त्र्यशक्तिर् ब्रह्मण इति

प्रतिपादितम् । येयं ब्रह्मणः कर्तृत्वशक्तिर् निखिलस्य जगत आविर्भावयित्री सैव कालशक्तिः । शक्तिषु सैव केवलं स्वातन्त्र्यशब्देन व्यपदिश्यते । भर्तृहरिणा महता विस्तरेण कालशक्तेर् वर्णनं कृतं वर्तते वाक्यपदीयतृतीयकाण्डान्तर्गतकालसमुद्देशे । तत्रत्योऽयं श्लोकः पठ्यताम्—

तमस्य लोकयन्त्रस्य सूत्रधारं प्रचक्षते ।
प्रतिबन्धाभ्यनुज्ञाभ्यां तेन विश्वं विभज्यते ।।[५]

इति । भेदावभासमयो हि संसारः । भेदश्च देशकालाभ्याम् । मूर्तिक्रियाविवर्तरूपमिदं विश्वम् । तत्र कालशक्त्यवच्छिन्नः क्रियाविवर्तः, दिक्शक्त्यवच्छिन्नश्च मूर्तिविवर्तः । अकाल-कलितमप्य् अनादिनिधनं तत्त्वं कालाख्यस्वातन्त्र्यशक्त्या विनिवेशिताभ्यां प्रतिबन्धाभ्यनुज्ञाभ्यां पौर्वापर्येणावभासते । योऽयं पदार्थानां कालक्रमेण जीवात्मगतः प्रत्यवभासः स एव कालशक्तेर् मुख्यं कार्यम् ।

(३) कालशक्त्यपेक्षया किंचिदूनाः सन्ति तिस्रः शक्तयः । तासां चतसृणां शक्तीनां सहोल्लेख एकस्यामेव कारिकायामुपलभ्यते । यथा—

दिक् साधनं क्रिया काल इति वस्त्वभिधायिनः ।
शक्तिरूपे पदार्थानामत्यन्तमनवस्थिताः ।।[६]

इति । एतासामेव मौलिकत्वम् । दृष्टिद्वयेन मौलिकत्वम् । अस्य विश्वस्य याव् इमाव् आविर्भावतिरोभावौ तद्दृष्ट्या तावत् तासां प्रथमतो मौलिकत्वम् । यतस् तत्कृताव् एव जगत आविर्भावतिरोभावौ । किंचास्य विश्वस्य योऽस्माभिः क्रियमाणः प्रख्योपाख्यारूपो व्यवहारः तद्दृष्ट्याप्य् आसां मौलिकत्वम् ।

(४) भोक्तृभोक्तव्यभोगरूपेऽस्मिन् जगति भोक्तारो जीवात्मानः । भोक्तव्यस्य किं स्वरूपम् । मूर्तिविवर्तक्रियाविवर्तात्मकं भोक्तव्यम् । प्रतिक्षणमसंख्या मूर्तय अथवा पदार्थाः समुत्पद्यन्ते । न च ते क्षणमपि तथैव तिष्ठन्ति । सततपरिणामिनस्ते भवन्ति । तेषां परस्पर-संपर्केणासंख्याः क्रियाः प्रादुर्भवन्ति । क्रियाः सर्वा अपि साध्याः । पूर्वमेव स्थिता अत एव सिद्धाः पदार्था एव ताः क्रियाः साधयन्ति । सिद्धसाध्यसमूहात्मको हि संसारः ।

सिद्धानां साध्यानां च परस्परव्यतिकररूपस्य संसारस्य साक्षिणो भवन्ति जीवात्मानः । न च ताटस्थ्येन साक्षिणः । अपि तु तत्कृतसुखदुःखानुभविनो भवन्ति । स्वानुभवान् परान् बोधयितुं च यतन्ते । परबोधने च तेषां मुख्य उपायः शब्दप्रयोगः ।

(५) शब्दप्रयोगः कथं भवति ? स्वानुभवं परान् बोधयितुं प्रवृत्तेन वक्त्रा वाक्यानि प्रयुज्यन्ते । वाग्व्यवहारे किंचित् स्वतन्त्रो भवति वक्ता । शब्दविशेषप्रयोगे वा शब्दानां ग्रथन-शैल्यां वा न तस्य परकृतः प्रतिबन्धो भवति । असाधवः शब्दा न प्रयोक्तव्या इत्येक एव

नियमस् तेन परिपालनीयो भवति। तेन परबोधनार्थं प्रयुज्यमानानि वाक्यानि सुबन्ततिङन्तपदसमुदायरूपाणि भवन्ति। प्रत्याययन्ति च तानि क्रियाकारकसंबन्धेन संबद्धं कञ्चिद्विशिष्टमर्थम्।

(६) वाक्ये समुपलभ्यमानेषु पदेषु तिङन्तपदम् अथवाख्यातमेव मुख्यम् इति मीमांसका वैयाकरणाश्च। आख्यातं च क्रियाया वाचकं भवति। क्रिया च पूर्वापरीभूतावयवत्वात् साध्या। एवम् आख्यातप्रधानं वाक्यम्, साध्यरूपक्रियाप्रधानश्च वाक्यार्थः। वाक्ये आख्यातव्यतिरिक्तान्यपि पदानि भवन्ति। तानि च प्रायेण नामपदानि। सत्त्वप्रधानानि नामानीति यास्कोक्तरीत्या तानि सत्त्वापरपर्यायसिद्धार्थाभिधायीनि भवन्ति। सिद्धाश्चार्थास् ते येषां व्यापारैराख्यातपदवाच्यायाः साध्यायाः क्रियाया अभिनिष्पत्तिर् भवति। यतस् तेऽर्थाः संभूय क्रियां साधयन्ति ततस् ते साधनशब्देन व्यपदिश्यन्ते शास्त्रकारैः।

(७) य एते साधनत्वेन व्यपदिष्टाः सिद्धाः पदार्थास् ते सर्वे ब्रह्मणः कालप्रभृतिशक्तिभिर् आविर्भाविता इति पूर्वमेवोक्तम्। ते न केवलं शक्तिसमुद्भाविता अपि तु स्वयं शक्तिमन्तः। यतस् ते शक्तिमन्तः अत एव साधनत्वेन व्यपदिश्यन्ते। एतावदेव न। वस्तुतो न पदार्थाः साधनं परं तु तद्गतं सामर्थ्यं तद्गता शक्तिरेव साधनम् इति तत्रभवान् भर्तृहरिः। इदमत्र तेषां वचनम्—

स्वाश्रये समवेतानां तद्वदेवाश्रयान्तरे।
क्रियाणामभिनिष्पत्तौ सामर्थ्यं साधनं विदुः॥[७]

इति। सामर्थ्यं शक्तिर् इत्यनर्थान्तरम्। शक्त एव पदार्थः क्रियां निष्पादयितुं पारयति। अतः शक्तेर् एव साधनत्वस्वीकारे लाघवं भवति। द्रव्यस्यैकस्वरूपत्वात् तस्यैव द्रव्यस्य तां तां क्रियां प्रति तत्तत्साधनत्वापत्तिर् दुरुपपादा। शक्तेस् तु तादृशं साधनत्वं सूपपादम्।

सर्वेऽपि घटपटादयः पदार्थाः शक्तीनां समूहरूपाः। द्रव्यस्य सदैव तथावस्थानेऽपि काचिच्छक्तिः क्वचिद् उद्भूता विवक्ष्यते। अतः 'घटं पश्य', 'घटेनोदकम् आनय', 'घटे उदकं निधेहि' इति कर्मकरणाधिकरणभावो नियमेनोपपद्यते। अत एवोक्तं तत्रभवता—

शक्तिमात्रासमूहस्य विश्वस्यानेकधर्मणः।
सर्वदा सर्वथा भावात् क्वचित् किंचिद् विवक्ष्यते॥[८]

इति। 'विवक्ष्यते' इति पदेनात्र भर्तृहरेर् मौलिकी दृष्टिर् आविष्क्रियते। इत्थमभिधीयते सा दृष्टिर हेलाराजेन— 'वैयाकरणानां शब्दार्थोऽर्थः, न वस्त्वर्थोऽर्थः' इति। भर्तृहरिणा स्वयं सूचितेयं दृष्टिः स्वकीयायां महाभाष्यटीकायाम्—'किमस्माकं वस्तुगतेन विचारेण। अर्थश्चास्माकं यः शब्देनाभिधीयते' इति वदता।

वक्ता तावत् प्रथमं बुद्ध्यार्थं निरूपयति । ततो निरूपितेऽर्थे शब्दं प्रयुङ्क्ते । तादृशेन शब्देन प्रतिपादितोऽर्थ एव शब्दार्थः । बौद्धार्थं इति यावत् । वस्त्वर्थस्तु बुद्धेर्वहिर्वर्तमानोऽर्थः । बौद्धार्थः कदाचिद् बाह्यार्थसंवादी भवति, कदाचिच्च न । मिथ्यागृहीतोऽप्यर्थः शब्दार्थो भवितुं शक्नोति । विद्यमानोऽपि वस्त्वर्थो यावद् बुद्ध्या नावध्रियते तावच्छब्दानां विषयो न भवति । किंच न सर्वे बुद्धिनिरूपिता अर्था युगपद् विवक्षाविषया भवन्ति । अत एवोक्तं 'क्वचित् किंचिद् विवक्ष्यते' इति । यदिदं बुद्धौ विपरिवर्तमानत्वं सत्ताया एवायं प्रकारः । इयमेव भर्तृहरिणोपचारसत्तेत्युच्यते । तद्व्यतिरिक्ता भवति बाह्यसत्ता या सम्प्रतिसत्तेत्यप्युच्यते । तद्यथा—

एतां सतां पदार्थो हि न कश्चिदतिवर्तते ।
सा च सम्प्रतिसत्तायाः पृथग् भाष्ये निर्दशिता ॥[९]

इति । एवं सर्वत्रोपचारसत्तारूढ एव शब्दार्थः । एवं स्थिते साध्यसाधनभावेन क्रियाकारकभावेनार्थानां निरूपणमपि बौद्धमेव । घटादयः पदार्थाः शक्तिसमूहा इति पूर्वमेवोक्तम् । घटे या करणत्वरूपा शक्तिस् तद्विवक्षायां 'घटेनोदकमानय' इत्युच्यतेऽस्माभिः । तत्रैव याधिकरणशक्तिस् तद्विवक्षायां 'घटे उदकं निधेहि' इत्युच्यते । तत्रस्थकर्मत्वशक्तिविवक्षायां च 'घटं पश्य' इत्युच्यते । नेदमाश्चर्यकरं यत् सती शक्तिर् विवक्ष्यत इति । कदाचित्तु शक्तिर् असत्यपि विवक्ष्यते । न शक्तौ शक्त्यन्तरयोगः, अनवस्थापातात् । तथापि 'शक्त्या साधयति,' 'शक्तिमादधाति', 'शक्तये दधि भुङ्क्ते' इत्यादिव्यवहारा दृश्यन्ते । एषु व्यवहारेषु शक्तेर् एव कर्मत्वकरणत्वादिशक्तिसमारोपः कुतो दृश्यते । तत् कथम् । उच्यते ।

साधनव्यवहारश्च बुद्ध्यवस्थानिबन्धनः ।
सन्नसन् वार्थरूपेषु भेदो बुद्ध्या प्रकल्प्यते ॥[१०]

इति । साधनव्यवहारस्य बुद्ध्यवस्थानिबन्धनत्वात् शक्तेर्विव्रियमाणाया बुद्ध्या स्वातन्त्र्येण निरूपणात् शब्देनाभिधाने शक्त्यन्तरयोगोऽविरुद्धः । साधनव्यवहारस्य बुद्ध्यवस्थाधीनत्वादेव प्रायेण पाकक्रियायामाधारभूता स्थाली तनुतरकपालत्वात् तत्र विशेषतोऽनुकूलेति स्वातन्त्र्येण विवक्षिता सती कर्त्री भवति 'स्थाली पचति' इति । इन्धनोपकारानपेक्षया तस्या एव साधकतमत्वविवक्षायां करणं भवति 'स्थाल्या पचति' इति । बौद्धे साधनव्यवहार एवं 'हन्त्यात्मानमात्मना' इत्युपपद्यते ।

अत इदं सिद्ध्यति यत् किमपि वस्तु नियतं साधनं न भवति । वक्तृविवक्षया पदार्थगततत्तच्छक्तिसमाश्रयणेन तत्तत्साधनव्यवहारो भवति । अत एव कानिचिदपादानसंज्ञाविधायकानि पञ्चमीविभक्तिविधायकानि च सूत्राणि प्रत्याख्यातानि भाष्यकृता । 'साधकतमं करणम्'[११] इत्यत्र तमब्विधानात् कारकाधिकारेऽतिशयो न विवक्षितः इति प्रतीयते । अपाये सति यद् ध्रुवं तदपादानमित्युक्तम् । अपायश्च संश्लेषपूर्वको विश्लेषः । प्रकर्षस्याविवक्षितत्वाद् गौणोऽप्यपायः, बौद्धोऽप्यपायः, अपायत्वेन गण्यते । सोऽप्यपादानसंज्ञायाः

प्रयोजकः। 'वृकेभ्यो भयम्' इत्यत्रास्ति बौद्ध अपायः। तद्यथा। योऽयं प्रेक्षापूर्वकारी भवति स बुद्ध्या पश्यति 'यदि गां वृकाः प्राप्नुयुध्रु वमनिष्टापातो भविष्यति' इति बुद्ध्या वृकान् प्राप्य बुद्ध्यन्तरेण ततो विभागं प्रतिपद्यते इत्यस्ति बौद्ध अपायः। अतो 'ध्रुवमपायेऽपादानम्'[१२] इत्येव संज्ञासिद्धेः 'भीत्रार्थानां भयहेतुः'[१३] इति सूत्रं प्रत्याख्यातम्। अनयैव रीत्या 'चोरेभ्यस् त्रायते', 'अध्ययनात् पराजयते', 'अधर्मात् जुगुप्सते' इत्यादिप्रयोगेष्वपि बौद्धापायस्य सत्वान्मूल-सूत्रेणैवापादानसंज्ञासिद्धिः। अत एव भीत्रार्थानामित्यादीनि सूत्राणि प्रत्याख्यातानि। 'पंचमी विभक्ते'[१४] इति पंचमीविधायकं सूत्रमपि प्रत्याख्यातम्। तत्रापि बौद्धस्यापायस्य संभवेना-पादाने पंचमीत्येव विभक्तिसिद्धेः। तथा हि 'कुरुभ्या पांचाला अभिरूपतराः' इत्यत्राभिरूप्येण समानेन गुणेन कुरुभिः सह पांचालान् बुद्ध्यैकत्वमापाद्यतिशयाभिरूपतावशात् कुरुभ्यः पांचालाः पृथक् क्रियन्ते इत्यस्ति संश्लेषपूर्वको विश्लेषोऽपायः। तत्प्रयुक्तापादानसंज्ञा पंचमी-विभक्तिश्च। एतस्य तत्त्वस्य प्रतिपादिकेयं तत्रभवतो भर्तृहरेः कारिका—

निर्धारणे विभक्ते यो भीत्रादीनां च यो विधिः।
उपात्तापेक्षितापायः सोऽबुधप्रतिपत्तये ॥[१५]

इति।

(९) एतदवधि यदुक्तं तद् द्रव्यव्यतिरिक्तशक्तिदर्शनानुसारेण। न सर्वे द्रव्यव्यतिरिक्तां शक्तिमभ्युपगच्छन्ति। केषांचिन्मते न द्रव्यव्यतिरिक्तातीन्द्रिया शक्तिरस्ति। भावानां कार्य-जनने स्वरूपमेव कारणम्, सहकारिण एव च शक्तिरिति ते प्रतिपन्नाः अतः परस्परं शक्ति-शक्तिमन्तश्च भावाः। भावेषु यद् यदा यदनुग्राहि तत् तदा तस्य साधनं तस्य शक्तिरिति तेषां मतम्। उक्तं च।

शक्तयः शक्तिमन्तश्च सर्वे संसर्गवादिनाम्।
भावास् तेष्वस्वशब्देषु साधनत्वं निरूप्यते ॥[१६]

इति।

(१०) द्रव्यव्यतिरिक्ता शक्तिरस्ति न वेति विवादो मीमांसकवैशेषिकयोः वैयाकरणानां त्वस्मिन् विवादे न कश्चिद् ग्रहः। ते हि शब्दप्रमाणकाः। यच्छब्द आह तत्तेषां प्रमाणम्। शब्दश्च पदार्थानां व्यतिरिक्तमेव साधनभावं प्रत्याययति। तथा च प्रातिपदिकेन द्रव्येऽभिहिते शक्तौ कृतबन्धा विभक्तिः प्रवर्तते। उक्तं हि हरिणा—

स तेभ्यो व्यतिरिक्तो वा तेषामात्मैव वा तथा।
व्यतिरेकमुपाश्रित्य साधनत्वेन कल्प्यते ॥[१७]
स्वशब्दैरभिधाने तु स धर्मो नाभिधीयते।
विभक्त्यादिभिरेवासावुपकारः प्रतीयते ॥[१८]

इति।

(११) वाक्यान्वाख्यानप्रसङ्गेन तत्रभवान् भर्तृहरिः वाक्यादपोद्धृतानां पदपदार्थानां स्वरूपनिरूपणे प्रवृत्तः। वाक्यार्थादपोद्धृतेष्वर्थेषु क्रियेव मुख्या। सा च तिङन्तपदवाच्या

पूर्वापरीभूतावयवा साध्या चेति पूर्वमेव प्रतिपादितम् । वाक्यगतैर्नामपदैः साध्यक्रियानिष्पत्तावुपकारिणां सिद्धस्वभावानां पदार्थानां बोधनं क्रियते । तेषां क्रियानिष्पत्तावेव तात्पर्यम् । इदं क्रियोपकाराभिमुख्यमेव नतिः अथवा नमनमित्युच्यते । क्रियाङ्गभावेन पदार्थानामात्मसमर्पणम् । अथवा आवर्जनमित्यप्युच्यते । तदुक्तम्—

निमित्तभावो भावानामुपकारार्थमाश्रितः ।
नतिरावर्जनेत्येवं सिद्धः साधनमिष्यते ॥[१६]

इति ।

(१२) 'सिद्धः साधनमिष्यते' इत्युक्तम् । यद् यदा यदनुग्राहि तत् तदा तस्य साधनमित्यप्युक्तम् । किं सिद्धमेव साध्यस्यानुग्राहि भवति ? किं साध्यमपि कदाचित् साध्योपकारकं न भवितुं शक्नोति ? अत्र महाभाष्यकारा एवास्माकं प्रमाणम् । 'कर्मणा यमभिप्रैति स संप्रदानाम्'[२०] इति लक्षणविचारावसरे प्रश्नोऽयं समुल्लसति—अकर्मकधातुविषये यत्र कर्मैव नास्ति तत्र कर्मणाभिप्रयगस्यासंभवात् किं संप्रदानसंज्ञा चतुर्थीविभक्तिश्च भवितुं शक्नुतः न वेति । कथं च 'युद्धाय सन्नह्यते' इति प्रयोगः ? तत्र क्रियाग्रहणकर्तव्यमिति वार्तिककारेण चोदिते भाष्यकारैरुक्तम्—न कर्तव्यम्, यतः क्रियापि कृत्रिमं कर्मेति । कृत्रिमं कर्म, कर्माख्यं साधनमित्यर्थः । कथं क्रियायाः कर्मत्वम् ? क्रियारूपेण कर्मणा च किमभिप्रेतं भवतीत्यत्र भाष्यकारेण यदुक्तं तत्रेदं तत्त्वम्—

क्रियानुष्ठानात् प्राङ् मनुष्यस्य चतस्रो बुद्ध्यवस्था भवन्ति क्रियारूपाः । प्रथमं तावत् प्रेक्षापूर्वकारी मनुष्यः किंचिदभीष्टं फलं बुद्ध्या संपश्यति । सेयं प्रथमा संदर्शनावस्था । तदनन्तरं संदृष्टे वस्तुनि भवतीच्छा, अथवा प्रार्थना । सेयं द्वितीया प्रार्थनावस्था । ततः प्रार्थितस्योपलब्धौ उपायमध्यवस्यति । सेयं तृतीयाध्यवसायावस्था । अध्यवसायादनन्तरं भवत्यारंभक्रिया मानसी प्रवृत्तिः । एतासु चतसृषु मानसक्रियासु उत्तरोत्तरा पूर्वस्याः पूर्वस्याः क्रियायाः कृत्रिमं कर्म । कर्तुरीप्सिततमं हि कर्म । अत्र सन्दर्शनक्रियया प्रार्थनक्रिया ईप्सिता भवति । प्रार्थनाक्रियया अध्यवसायक्रिया, अध्यवसायक्रियया आरंभक्रिया । प्रकृते 'युद्धाय सन्नह्यते' इत्यत्र आरंभक्रिया चक्षुरिन्द्रियगोचरा तनुत्राणबन्धनादिसन्नहनक्रिया ईप्सिता भवतीति सा कृत्रिमं कर्म । अनेन सन्नहनक्रियारूपेण कृत्रिमेण कर्मणा युद्धमभिप्रैतीति युद्धस्य संप्रदानसंज्ञा चतुर्थीविभक्तिश्च सिद्ध्यतः । एतत् सर्वं मनसि निधाय भाष्यकारमतमनुसरता भर्तृहरिणोक्तम्—

संदर्शनं प्रार्थनायां व्यवहारे त्वनन्तरा ।
व्यवसायस्तथारंभे साधनत्वाय कल्पते ॥
पूर्वस्मिन् या क्रिया सैव परस्मिन् साधनं मता ।
संदर्शने तु चैतन्यं विशिष्टं साधनं विदुः ॥[२१]

इति ।

(१३) एवं पदार्थानां शक्तिः साधनं, साधनं च क्रियाया निष्पादकमिति मुख्यं तत्त्वं प्रतिपादितं भर्तृहरिणा । अनित्यानां पदार्थानां याः शक्तयस्तासां पदार्थहेतोरेवोद्भवः । अतस्तेषां सहजाः शक्तयः । न ह्यशक्तस्य पदार्थस्योत्पत्त्यनन्तरमधीयते शक्तिः । नित्यानां तु नित्या स्वाभाविकी शक्तिः । शक्तिश्च यावद्द्रव्यभाविनी । द्रव्यापाये निराधारा सावस्थातुं न पारयति । शक्तेः सहजत्वेऽपि भावाः सहकारिसन्निधान एव स्वकार्यजनन उद्युक्ता भवन्ति । तदैव स्वशक्त्यभिव्यक्तिं कुर्वन्ति । इत्यभिव्यक्तिकाल एव कार्योपयोगित्वात् साधनमित्युच्यते । इतरेतरस्य शक्तिमर्पयन्तः पदार्थाः क्रियां निर्वर्तयन्तीति साधनशक्तिभिः सहैव क्रियाणां व्यापाररूपाणां जन्म कथ्यते । तथा च येभ्य एव क्रिया जायन्ते तेभ्य एव शक्तय इति सहजत्वम् । उपजातशक्तयस्तु क्षणान्तरे क्रियानिर्वर्तका इति साध्यसाधनभावे नास्ति क्षतिः ।

(१४) क्रियास्वरूपनिरूपणावसर इव साधनस्वरूपनिरूपणावसरेऽपि प्रवृत्तितत्त्वस्य चर्चा क्रियते भर्तृहरिणा । केयं प्रवृत्तिर्नाम ? । तत्र पठ्यतां भर्तृहरेरेव वचनम् ।

> प्रवृत्तिरेव प्रथमं क्वचिदप्यनपाश्रिता ।
> शक्तीरेकाधिकरणे स्रोतोवदनुकर्षति ॥[२२]
> क्रियामन्ये तु मन्यन्ते क्वचिदप्यनपाश्रिताम् ।
> साधनैकार्यकारित्वे प्रवृत्तिमनपायिनीम् ॥[२३]

इति । प्रवृत्तिरिति काचिदनपेक्षितहेतुव्यापारा नित्या क्वचिदप्यनपाश्रिता क्रियोच्यते । केचिदिमां प्रवृत्तिमपूर्वं धर्माधर्माख्यमदृष्टसंज्ञकमाहुः । अपूर्ववशाद्धि सर्वं भवति न वा । कैश्चित्तु सा कालशक्तिरित्युच्यते । एवं व्याख्याता सा साधनशक्तिभिः सह साध्यमेकं फलं साधयतीति ताः शक्तीः द्रव्याणां प्रवहद्रूपा सती समाकर्षयति । प्रथमं सापूर्वादिरूपतया सामान्येनाभिधीयते । परतस्तु यथास्वं साधनव्यापारोपपादितप्रविभागा साध्यमानरूपतया क्रियेति व्यवह्रियते । तथा चानुद्भिन्नविशेषरूपदशायां कारकशक्तीनां प्रवर्तिका । ततो निष्कृत्य प्रवृत्तिरिति सामान्यसमाख्ययानाश्रितैव भण्यते । विशेषप्रक्रमे तु साधनसमवायिनी साध्यतामनुभवन्ती यथायथं पचिक्रिया भिदिक्रियेत्यादिव्यवहारं वर्तयति । अत एव कारकाणां प्रवृत्तिविशेषः क्रियेति लक्षणमुद्दिष्टम् । अपूर्वादिस्वभावेयं प्रवृत्तिः सामान्यभूता द्रव्याणां कारकशक्तिराधाना प्रवृत्तिरिति भण्यते । नित्यत्वादन्यसाधनसाध्या न भवति तदेव प्रथमं कारकम्, कारकाणामपि कारकम् । यदुक्तम्—

> सामान्यभूता सा पूर्वं भागशः प्रविभज्यते ।
> ततो व्यापाररूपेण साध्येव व्यवतिष्ठते ॥
> प्रकृतिः साधनानां सा प्रथमं तच्च कारकम् ।
> व्यापारणां ततोऽन्यत्वमपरैरुपवर्ण्यते ॥[२४]

। इति शम् ।

सन्दर्भ-सूत्राणि

१. वाक्यपदीयम्—१. २. ४.
२. वा० (जा०) २३.
३. वा० १. ३.
४. कालाख्येन हि स्वातन्त्र्येण सर्वाः परतन्त्रा जन्मवत्यः शक्तयः समाविष्ठाः कालशक्ति-वृत्तिमनुपतन्ति । वा० १, ३ गता वृत्तिः ।
५. वा० ३. (का०) ४.
६. वा० ३. (दिक्) १.
७. वा० ३. (सा) १.
८. वा० ३. (सा) २.
९. वा० ३. (सं) ५१.
१०. वा० ३. (सा) ३.
११. अष्टाध्यायी १. ४. ४२.
१२. तत्रैव १. ४. २४.
१३. तत्रैव १. ४. २५.
१४. तत्रैव २. ३. ४२.
१५. वा० ३. (सा०) १४७.
१६. वा० ३. (सा०) ९.
१७. तत्रैव ३. (सा०) १५.
१८. तत्रैव ३. (सा०) १३.
१९. तत्रैव ३. (सा०) १४.
२०. अष्टाध्यायी० १. ४. ३२.
२१. वा० ३. (सा०) १६, १७.
२२. वा० ३. (सा०) ३३.
२३. वा० ३. (क्रि०) ३६.
२४. वा० ३. (क्रि०) ३७, ३८.

ON SOME INSTANCES OF THE USE OF DOUBLE SUFFIXES IN THE AŚOKAN EDICTS

S. N. Ghosal

CALCUTTA

In the Aśokan edicts[1] there are certain causative forms, which bear unmistakable evidence for the application of two causative suffixes in course of their formation. In most of the cases the stem-elements of such forms show *guṇa* or *vṛddhi*, which the causative forms ordinarily maintain, but to such radical elements the causative suffixes are appended, which in fact appear to be the direct descendants of the skt. causal suffixes.[2] We have noted the following forms, which are of the described nature: *lekhāpitā* (R. E I Girnar; R. E VI. G: R. E XIV. G), *hārāpitāni* (R. E. II. G), *hālāpitā* R. E. II, Kalsi, Dhauli, Jaugaḍa), *ropāpitāni* (R. E. II. G), *lopāpitā* (R. E.II. K., D., P. E. VII), *ropapita* (R. E. II, Mansera), *khānāpitā* (R. E. II..G), *khānāpitāni* (R. E. II. K. D. J; P. E. VII); *lopāpitāni* (R. E. II. D; P. E. VII), *ānapayite* (R. E. III. K; R. E. VI. K.); *lekhāpitaṁ* (R. E. IV. G), *srāvāpakaṁ* (R. E. VI. G), *haṁneyasu* (R. E. XIII. Shahbazgarhi), *lekhāpeśāmi* (R. E. XIV. K), *sāvāpayāmi* (P. E. VII), *sāvāpitāni* (P. E. VII), *Kālāpitā* (P. E. VII.) *Kālāpita* (Rumminidei P. Inscription), *Kālāpitāni* (P. E. VII), *likhāpāpitā* (P. E. VII), *sāvāpite* (Minor R. E. I Brahmagiri, Erragudi, Rajulamandagiri), *lekhāpayātha* (Minor R. E. I Sahasram), *lekhāpeta* (Minor R. E. 1 Rupnath), *lekhāpeta-vayata* (Minor R. E. I R), *usapāpita* (Rumminidei P. Inscription and Nigliva P. Inscription).

Let us analyse these forms and see how they bear the traces of the application of double suffixes. While explaining them we cite their corresponding skt. forms as these are assumed to be helpful in recognising their true nature. Let us take them in the order they are cited: *lekhāpitā* corresponds to skt. *lekhitā* Here the root *likh*-already gets the causative value with the strengthening, consequent on the modification of the vowel *i* to *e* by guṇa. Now the original suffix, which brings this change, is lost due to the annexation of the past-participle suffix-*ta* to the root, that has already developed into the causative stem. But the other causative suffix *—āp—*, which is abstracted from the skt. *ā*—roots,[3] is added to the strengthened root-element perhaps with the view to making the sense

of the causative more predominant and clear. Between this causal suffix and the past-participle —*ta* the vowel *i* comes as a means of ligature (Binde-vocal). The form *lekhāpitaṁ*=skt. *lekhitaṁ* is identical with the former ; there occurs only this difference that this form is neuter while the preceding one is feminine.

In the form *lekhāpeśāmi*=skt. *lekhayiṣyāmi* we note the strengthening of the root, caused by the annexation of the causative affix, which is suppressed. But to this strengthened root retaining the causative value the suffix-*āpe*[4] (<skt. *āpaya*—) has again been added, which stands immediately before the tense—affix —ś of the future. The form *likhāpāpitā*=skt. *lekhitā* does not show the strengthening of the root—syllable, but here after the radical element two causative affixes *āp*+*āp* have been added. In *lekhāpayātha* and *lekhāpeta*=skt. *lekhayata* i.e. a form of the 2*nd* pers. pl. of the imperative from the causative stem of *likh*— we note the strengthening of the vowel of the root, which itself conveys the causative value; but along with this in the former one notes the use of the causative suffix —*āpaya*—but in latter —*āpe*-.The word *lekhāpetavayata* creates some confusion to us. Basak translates it into skt. as *lekhapiyata*, which we cannot understand. The word as it follows from the context, bears the sense of the imperative. But here we note both the strengthening of the root-element and the employ of the causative suffix—*āpe*-.

The word *hārāpitāni*=skt. *hāritāni* shows the identical feature. The strengthening of the root *hṛ*—by way of vṛddhi happens due to the annexation of the causative affix, which in the past participle suffix—*ta*. But the lengthening (vṛddhi) of the radical element stands there as its indication. In the Pkt. form the lengthening occurs, but side by side there appears the causative affiix—*āp*-, which is annexed to the strengthened causative stem. Between the causative affix—*ā*p and the past participle —*tā* the vowel *i* comes as a means of connection. The word *hālāpitā*, which comes in some versions, as a variant of the form, discussed maintains exactly the same feature and does not call forth any special remark. In the shorter form the nom. pl. affix—*āni* has only been substituted by the affix—*ā*, of which the traces are abundantly found in Pkt.

The forms *ropāpitāni* and *lopāpitāni*=skt. *ropitāni* proceed from the root *ruh*—. In the causative the stem appears as *rop*—with the strengthening of the vowel *u* to *o* and the substitution of the sound —*h*— by —*p*— . But to the strengthened causative stem the causative affix —*ap*-

has again been annexed. The change of the sound *r* to *l* is due to the dialectal variation. The words *lopāpitā* and *ropapita*, which are variants of the above-mentioned words, show exactly the same feature as regards their adoption of the causative affixes is concerned. The forms *khānāpitāni* and *khānāpitā*=skt. *khānitāni* fall in the same line in as much as we note here both the strengthening of the root *khan*—into *khān*—and the annexation of the suffix –*āp*—to the strengthened stem. So here too the development is identical.

In no way different from the above forms are *kālāpita*=skt.*kāritā*, *kālāpitā*=skt. *kāritāh* and *kālāpitāni*=skt. *kāritāni*, all of which proceed from the root *kṛ*—. In addition to the above-described feature they show this peculiarity that they change the consonant *r* to *l* in the radical element, which is due to the influence of the eastern dialect. The forms *srāvāpakam*=skt. *śrāvakam*, *śāvāpayāmi*=skt. *śrāvayāmi*, *sāvāpitāni*=skt. *śrāvitāni* and *sāvite*=skt *śrāvitam* are homogenous and proceed from the skt. root *śru*—. The annexation of the causative affix presents the causative stem as *sāv* and in one case *srāv*—and to the latter one finds the application of the element —*āp*—or—*āpaya*—, which in, fact, makes the root inflected by the addition of double suffixes. This shows the forms of the root *śru*— as behaving exactly like the preceding.

The forms *ānapayite*=skt. *ājñāpitam* is conspicuous in as much as here the root is followed not only by the causative suffix —*ap*— but also the element —*ay*—, which is borrowed from the form of the present tense of the same very root *jñā*—in the causative. This ought not to have occurred in the form of the past participle, but has wrongly been appended.[5] This form *ānapayite* too on the above consideration may be considered as to have been inflected with double suffixes and it rightly claims a place in the present discussion. The form *usapāpita*=skt. *ucchrāyitaḥ*, which is used twice, proceeds from the root *śrī*—preceded by the prefix *ud*—. The two causative suffixes *ap*+*āp* are directly added to the root, which produces this form. This feature of the absorption of two causative suffixes by the form is clear and it is unmistakably recognised.

The form *haṁñeyasu*=skt. *hanyeran* may also be taken for consideration here. Although it is not a form of the causative it seems to have been formed with two suffixes--one making the use of the other superfluous and as such un-called for. The form is one of the passive in the optative mood. Now it should be noted that the root *han*—adopts the

passive suffix—*ya* in the form and builds the passive stem *haṁña*—(=skt. *hanya*—> *hanna*—> *haññа*—in the Eastern dialect due to the Māgadhī influence, then *haṁña*—in the Aśokan Prākrit). To this form again the passive suffix—*ia* (<—*īa*— <*ya*—) has been added, which together with the personal termination – *su* produces the above form *haṁñeyasu*. The element *y* might have come here by way of euphonic glide. So this form too bears the traces of the application of two suffixes and retains the right to be discussed here.

Now barring the last-mentioned case all the forms, disccussed above, show the absorption of two causative suffixes by them. This feature is not a strange phenomenon in the Aśokan edicts. The tradition of this kind of use has been coming down most probably from long—at least in the spoken languages and the same found expression also in the Aśokan inscriptions. This is best illustrated from the fact that in Pāli we find many instances, where the application of two causative suffixes is to be found. We refer to the section 182 of Geiger's work bearing the title "*The Pāli Language and Literature.*" Some of the forms, which have been recorded by the author there, are: *kappāpeti vāḍḍhāpeti, visajjāpeti, gāhāpeti, kārāpeti, mārāpeti, pūrāpeti, chedāpeti, yojāpeti, ṭhapāpeti, ropāpeti* etc. All these are definite instances about the use of the two causative suffixes in the same forms in Pāli and the forms in the Aśokan edicts too are unmistakably consanguinous with them.

It may be pointed out that the feature is not lacking in the later Prākrits too.[6] In the latter we find forms like *kārāvei, hāsāvei, pāḍhāvei*[7] *kappāvemi, vaḍḍhāvemi, dhovāvedi, moāvemi, moāvehi,* etc. Pischel, however, records only a single instance of the use of two suffixes, which is *davāvei* and, according to him, it develops from the root *dā*.[8] But the other forms, though not mentioned by him, bear also the identical feature and stand as clear evidences for the use of double suffixes in the same form.

This clearly shows that in the Aśokan Pkt. we find a feature, which has got a very wide application. Hultzsch did not mention it unequivocally in his analysis of the speeches of the Aśokan edicts, but his reference to the relevant section of the work of Geiger perhaps shows that he might have been acquainted with the phenomenon. As pointed out before, this kind of use of two suffixes simultaneously perhaps develops from an attempt of giving a stamp of individuality and distinctness to the causative formations and of making them free from any kind of ambiguity, to which

the Prākrit forms become a prey due to the disintegration of the consonantal elements in the later phase of Pkt. The influence of the spoken speeches, where the rigidity of grammar is not scrupulously maintained, might have been at work for the large-scale infiltration of such forms in literature. The Aśokan edicts, it may be pointed out, did not possibly lose contact with the spoken tongues of the people and as such they kept the doors open for the penetration of the irregular formations like those, which are discussed here.

References

1. We have used mainly the text, which is edited by R. G. Basak. But occasionally the other texts were also consulted—particularly those of Jules Bloch and R. K. Mookherjee.

2. The causative endings —*e*— and —*āve*— come from the Sanskrit endings —*aya*— and —*āpaya*— respectively.

3. Vide, Whitney, Sanskrit Grammar, ‡1042. i, j etc.

4. This has developed into —*āve*— in the later Pkt.

5. This has been clearly indicated by Hultzsch, who states: "This barbarous equivalent *ājñapta* and *ajñāpita* retains the causative character —*aya*— of the present *ājñāpayati.*"

   Hultzsch, Corpus Inscriptionum Indicarum p. lxxxiii.

6. Vide Pischel, Die Grammatik der Prākṛt Sprachen, ‡‡552 ff.

7. Vide Vararuci, Prākṛtaprakāśa chap. VII. 27.

8. "Zu da (geben) wird in JM eine doppel-form *davāvei* in der Bedentung >veranlassen zu geben >>gebildet."

   Pischel, Grammatik ‡552.

THE SAPTARṢIS IN THE VEDIC AND THE POST-VEDIC LITERATURE*

V. . Rahurkar

POONA

The *ṛṣis* in the Ṛgveda are typified by a particular group of seven and are mentioned as such four times in the RV. In IV. 42.8 *ṛṣi* Trasdasyu says that the seven sages were fathers who endowed his mother Purukutsānī with a brave son (i. e. himself)[1]. In X. 109.4 the *ṛṣiṣ* are mentioned as seven and are said to have been practising penance[2]. In X.130.7 we are told, "The Seven God-like *ṛṣis* were versed in ritual and metre, in hymns and rules. Viewing the path of those of old the sages have taken up the reins like chariot-drivers."[3] In I.31:5 the term सप्तविप्राः is interpreted by Sāyaṇa to mean the seven sages—

भरद्वाज, कश्यप, गोतम, अत्रि, विश्वामित्र, जमदग्नि and वसिष्ठ.

In the later *Saṁhitās* they are mentioned several times[4]. The Bṛhadāraṇyaka Up. enumerates them as Gotama, Bharadvāja, Viśvāmitra, Jamadagni, Vasiṣṭha,Kaśyapa and Atri. In the RV. itself Kutsa (I.105.6), Atri (I.117.3); Rebha (I.117.4), Agastya (I.179.6), the Kuśikas (III. 53.10), Vasiṣṭiha (VII. 33.13), Vyaśva (VIII. 23.16) and others appear directly as *ṛṣis*.

The Viṣṇu Purāṇa enumerates the following persons as the great sages of the Vaivasvata Manvantara or the present age of the creation—Vasiṣṭha, Kaśyapa, Atri, Jamadagni, Gautma, Viśvāmitra and Bharadvāja. The *ṛṣis* are named individually in the Śatapatha Brāhmaṇa and the Bṛhadāraṇyaka Upaniṣad and are identified in the former work with the seven stars in the constellation of the Great Bear. The latter work, as we have noticed, names them as Gautma, Bharadvāja, Viśvāmitra, Jamadagni, Vasiṣṭha, Kaśyapa and Atri. The two lists, that of the Viṣṇu Purāṇa and that of the Upaniṣad, agree in the names of the individuals, but not in the order.

It is significant that the individuals in this group figure in the group of the so called gotrarṣis.[5] Baudhāyana, who deals with the classification of the *gotras*, also enumerates the seven *ṛṣis* as Jamadagnī, Viśvāmitra,

Atri, Bharadvāja, Gautama, Kaśyapa and Vasiṣṭha i. e. the individuals are the same as in the above lists but the order is different. Āśvalāyana mentions the same individuals but with a still different order.

The modern orthodox Hindu idea of *gotra* is that it is the name of *ṛṣi* or ancestor in whose line one is born, the ancestor being a son or a descendent of one of the seven great ṛṣis and the eighth Agastya.[6] But a very important śloka in the MBh. states that originally the *gotras* were four only—

मूलगोत्राणि चत्वारि समुत्पन्नानि भारत ।
अंगिराः कश्यपश्चैव वसिष्ठो भृगुदेव च ॥
कर्मतोऽन्यानि गोत्राणि समुत्पन्नानि भारत ।
नामधेयानि तपसा तानि च ग्रहणं सताम् ॥

(Śānti Parvan Ch. 296).

This means historically that there were originally four great stocks of Aryan families and that subsequently they were counted as eight.[7] Looking into the later eight names and the ancient four, we find that Kaśyapa and Vasiṣṭha remain, but Bhṛgu is substituted by his son Jamadagni, Angiras is substituted by his two sons or grandsons Bharadvāja and Gautama and three are entirely new additions, viz. Viśvāmitra, Atri and Agastya. Possibly these were newly-arrived Aryan families, but that they must have come in Vedic times is clear, for all these are well-known Vedic *ṛṣis* or composers of Vedic hymns.

It is really strange to see that the MBh. of 300 B. C. still retains the tradition that the original Aryan families were four, inspite of the fact that all the *Śrautasūtras* give the original family *ṛṣis* as eight. The line कर्मतोऽन्यानि गोत्राणि etc. is rather difficult of explanation. Nilakantha explains it as "विश्वामित्रमासीद्यदिदं किंच तस्माद्विश्वामित्रमित्याचक्षते एतमेत्र सन्तमित्यादिश्रुतेः कर्मजान्येव सर्वाणि गोत्राणि ।"

We have the Puranic story referred to here that Viśvāmitra became a Brahmin by his penance. But we know nothing about Atri's *Karma*. Agastya is said to be a son of Maitrāvaruṇa, i. e. in a sense a brother of Vasiṣṭha but this is a later legend. Whatever this may be, we may be sure that there were originally four great Aryan families which came into India and that three other families came in subsequently, the old Angiras being subdivided into two. This gives us eight families or *gotra* stocks.[8] In

these families were born many men of note, who by their great renown gave their names to their descendants. The next line नामधेयानि तपसा of the MBh. may thus be best interpreted. New names arise owing to austerity or renown and thus the number of *gotras* goes on increasing.[9]

Pargiter lays stress on the statement about the four मूलगोत्रS in the MBh. and says that it proves his contention that the early priestly families began with the Non-Ailas. The Kaśyapas, as he himself points out, are definitely known to be of later origin than the Bhṛgus and the Vasiṣṭhas or even the Atreyas and yet they are counted among the original *gotras*.

But this discrepancy may be explained as the result of the evident Bhṛguization of the extant MBh. which is so clearly demonstrated by Dr. Sukthankar.[10] One Kaśyapa is venerated by Paraśurāma, the Bhārgava hero of the epic, and it is likely that the redactor in his partiality for the Bhārgavas has also glorified the person who was respected by Paraśurāma. But the omission of Atri from the *Mūlagtoras* is not easily explained unless we take for granted that there was some tradition regarding the later origin of the Atris.[11]

I entirely agree with Dr. Ghurye, therefore, who concludes that the three priestly families of the Bhṛgus, the Angirasas and the Vasiṣṭhas were the oldest. The priority of these three families is further strengthened by the fact that in the ṚV. the Pitṛs or ancient fathers are Navagvas, Angirasas, Atharvans, Bhṛgus and Vasiṣṭhas.

The term 'Seven *ṛṣis*' denotes also 'the Great Bear' in one passage in the RV. (तेषामिष्टानि समिधा मदन्ति यत्रा सप्तऋषीन् पर एकमाहुः) and occasionally later(AV.6.4.01. अभयं नोऽस्तूर्वन्तरिक्षं सप्तऋषीणां च हविषाभयं नो अस्तु ।) This is probably a secondary use, instead of the seven *ṛkṣas* brought about by the frequent mention of the seven *ṛṣis*. The word ऋक्षाः in the ṚV. I.24.10 denotes 'seven bears' later called 'seven *ṛṣis*' the constellation of 'the Great Bear' (Ursa Major). The word *ṛkṣa* originally signifies 'one who tears open' and hence a bear (V.56.3) but the word in plural means the seven *ṛṣis* (खाटले बाजले in Marathi). *Ṛkṣa* has also come to denote 'a planet' (cf. *Ṛkṣarāja*= the moon). The planet is called Arctian in Greek and Ursa in Latin. This goes to prove that we have not borrowed the name from the Romans. MaxMuller in his 'Science of Language'

Vol. II says, "the word *ṛkṣa* in the sense of 'the bright' has become the name of the bear, so called either from his bright eyes, or from his bright tawny fur. The same name in the sense of bright ones had been applied by the Vedic poets to the stars in general, and more particularly to that constellation which in northern parts of India was the most prominent."

In the AV. the seven sages are said to know the seven milkings of the sacrificial bull (4.11.9).[12] Virāj, as a cow, came to the seven sages. Bṛhaspati Angirasa milked from her the 'Brahman' and penance on which the seven sages subsist (AV. 8.10.25).[13] It is to be noted that the names of the seven sages are nowhere specified in the AV. They are invoked to bestow wealth and Brahmanical splendour on the singer (X.5.39). They are also called 'Being makers' भूतकृत्[5] (II.1.1.24). They churn the fire in the ब्रह्मौदन सव (11.1.8). *Mekhalā*, the girdle tied at the magical rites is the sister of the Being makers (6.133.4), On the earth the ancient sages, who created beings, sang for the attainment of cows (12.1.31).

In the Śrāvaṇī ceremony of the Ṛgvedi Brahmins there is a ritual called ṛṣi-puñjana wherein Kaśyapa, Atri, Bharadvāja, Viśvāmitra, Gautama, Jamadagni and Vasiṣṭha are mentioned and the ṛṣikā Arundhatī also is invoked with the *Mantra*—

अत्रेर्यथानसूया स्यात् वसिष्ठस्याप्यरुन्धती ।
कौशिकस्य यथा सती तथा त्वमपि भर्तरि ॥

A small star near the Great Bear in the sky has, therefore, received the name of Arundhatī. The Hiraṇyakeśins regard the *Saptarṣis* as follows—Viśvāmitra, Jamadagni, Bharadvāja, Gautama, Atri, Vasiṣṭha, and Kaśyapa.

Let us examine now the '*Tarpaṇa* list' of the *ṛṣis* of the Ṛgvedi Brahmins. The list includes the following *ṛṣis*—

The Śatarcinaḥ, Madhyamāḥ, Gṛtsamada, Viśvāmitra, Vāmadeva Atri, Bharadvāja, Vasiṣṭha, Pragāthas, Pāvamanyas, the Kṣudrasūktas and the Mahāsūktas. Now all of them are not the seers of the *Maṇḍalas*. Only six of them, nemely Gṛtsamada, Viśvāmitra, Vāmadeva, Atri, Bharadvāja and Vasiṣṭha are considered to be the seers of the *Maṇḍalas* and out of these four nemely Viśvāmitra, Atri, Bharadvāja and Vasiṣṭha are included among the *Saptarṣis*. The Pragāthas are the Kaṇvas. The word is

explained in the Aitareya Brāhmaṇa as" प्राणदेवताया मूर्तिविशेषप्रतिपादका ऋग्द्वयात्मकसूक्तरूपा मन्त्रविशेषाः प्रगाथा इत्युच्यन्ते । तन्मन्द्रष्टारोऽपि प्रगाथनामकाः । (2.2.2.). As the Ninth *Maṇḍala* deals with Pavamāna soma the seers are called *Pāvamānyas*. The seers of the tenth *Maṇḍala* are designated as the *Kṣudrasūktas* and the *Mahāsūktas*. Out of the 191 *sūktas* the first 129 are conventionally called *Mahāsūktas* and the remaining are called *Kṣudra-sūktas*. But this division does not tally with the number of *ṛks* in the *sūktas*. In the *Tarpaṇa* the *Kṣudrasūktas* occur first and then the *Mahāsūktas*. Sāyana, however, in his commentary on the Aitareya *Āraṇyaka* says– जातवेदसे (ऋ. १.९९) इति सूक्तमेकर्चत्वात् क्षुद्रसूक्तरूपम् । अस्य वामस्य (ऋ.१.१६४.) इति एतत् सूक्तं द्विपंचाशदृचत्वात् महासूक्तम् । एवं उदाहरणानि द्रष्टव्यानि ।" and adds दशर्चताया अधिकं महासूक्तं विदुर्बुधाः (ऐ. ब्रा. २९. ९.४) The term शतर्चिनः and its significance has been explained by me in my thesis, 'The seers of the *ṚV*. recently published by the University of Poona.[14]

The MBh. gives the list of the *Saptarṣis* in two different ways. In the Śalyaparvan (42·52) we have Kaśyapa, Atri, Bharadvāja, Viśvāmitra, Gautama, Jamadagni, and Vasiṣṭha, while in the Śāntiparvan we have (1) Marīci (2) Atri, (3) Angiras (4) Pulastya (5) Pulaha (6) Kratu and (7) Vasiṣṭha. It is also conventionally held that in each Manvantra there are 'Seven *ṛṣis*'. The lists differ according to different *Purāṇas*. This shows that the 'Saptarṣis' must have been a professional or dynastic title.

The seven *ṛṣis*, as mentioned in the *ṚV*. are all composers or seers of hymns. e. g. (1) Gautama (I.74.93); (2) Viśvāmitra (III.1.12, 24.62); (3) Atri (V. 1.10,7.37, 77,83-86); (4) Bhardvāja (VI *Maṇḍala*). (5) Vasiṣṭha (VII *Maṇḍala*) (6) Jamadagni (IX *Maṇḍala* and VIII), and (7) Kaśyapa (IX *Maṇḍala*).

One thing that strikes us is the perpetuity in our memory of the seven *ṛṣis* and according to some scholars they represent the different aspects which conduce to the advancement of the society e. g. scientists and colonisers like Gautama, Agastya, Gṛtsamada, Viśvāmitra, Leaders of the people, fighting for their cause like Atri; the fighter Vasiṣṭha, the dictator Jamadagni; the catholicity of Bharadvāja and the organiser Kaśyapa.

But one doubts very much whether we can divide the work of the galaxy of these *ṛṣis* into water-tight compartments. All that we can say is that these *ṛṣis* must have performed deeds conducive to the well-being

of the society and as a consequence, must, naturally have been perpetuated in its memory for the last thousands of years.

The *Saptarṣis* are also said to be the joint authors of the ṚV IX.67; 107 and X.137.[15]

As regards IX.67 Sāyaṇa says that the *saptarṣis* are (1) Bharadvāja (2) Kaśayapa Marīca (3) Gotama Rāhūgaṇa (4) Atri Bhauma (5) Viśvāmitra, (6) Bhārgava Jamadagni and (7) Vasiṣṭha Maitrāvaruṇi. In his gloss on IX.107 Sāyaṇa says; 'त्वं सोमासि' इत्यग्रोक्ता भरद्वाजकश्यपाद्या सप्तर्षयः। and in X.137 he says "उत देवा इति सप्तर्चम् नवमं सूक्तमानुष्टुभं वैश्वदेवं भरद्वाजकश्यपगोतमात्रिविश्वामित्रजमदग्निवसिष्ठाः इति।"

Now, does this joint authorship of the *saptarṣis* suggest their contemporaneity ?

It is significant to note, however, that though Sāyaṇa names Kaśyapa Mārīca as one of the *saptarṣis*, Kātyāyana does not. The Sarvānukramaṇī On IX.67 says, "त्वं सोमासि द्वात्रिंशद्भरद्वाजः कश्यपो गोतमोऽत्रिर्विश्वामित्रो जमदग्निर्वसिष्ठ इति।"

It will thus be seen that Kātyāyana does not name Kaśyapa as Kaśyapa Mārīca and Gotama Rāhūgaṇa. We know that apart from Mārīca Kaśyapa, there was another Kaśyapa, who was the father of Avatsāra Nārada and Arundhatī, the wife of Vasiṣṭha and, therefore, evidently it is he who is meant as one of the *saptarṣis*. It is probable, therefore, that all the *saptarṣis* are more or less contemporary.[16]

References

*Paper read th 23rd session o the A. I. O. C. at Aligarh.

1 अस्माकमत्र पितरस्त आसन् सप्त ऋषयो दौर्गहे बध्यमाने।
त आयजन्त त्रसदस्युमस्या इन्द्रं न वृत्रतुरमर्धदेवम्॥

2 देवा एतस्यामवदन्त पूर्वे सप्त ऋषयस्तपसे ये निषेदुः।

3 सहस्तोमा सहच्छदस आवृतः सहप्रमा ऋषयः सप्त दैव्याः।
पूर्वेषां पन्था अनुदृश्य धीरा अन्वालेभिरे रथ्यो न रश्मीन॥

4 VS XIV.24; AV.XI.1.1.24; XII. 1.39 etc.

5 Gotrarṣis are those sages with reference to whom all the known *gotras* or family-names were classified at a particular time.

6 विश्वामित्रो जमदग्निर्भरद्वाजोऽथ गौतमः ।
अत्रिर्वसिष्ठ कश्यप इत्येते सप्त ऋषयः ॥
एतेषां सप्तानां ऋषीणामगस्त्याष्टमानां यदपत्यं तद्गोत्रमित्याचक्षते ।

7 This fact is still traceable in the *sūtras*, which, though they describe *gotrarṣis* as 8 (*Saptarṣis* and Agastya), still begin with the Bhṛgu gaṇa. The Bhṛgugaṇa and the Angirasagaṇa are names not of the Saptarṣis but of the ancestors of some of them (cf. बोधायनोर्वितस्तु अनुवादत्वात् उपलक्षणं तेन भृग्वङ्गिरोगणेषु सप्तर्षिभिन्नत्वेऽपि अधिकाराद्गोत्रत्वम् ।)

8 AIHT Page 186

9 See PAIOC IX Dr. Ghurye's Precidential Address of the Vedic Section.

10 ABORI Vol. XVIII p. 176.

11 The RV. describes him as the seer of the five tribes (पाञ्चजन्य) The Brahmanic tradition looks upon him as the greatest of the sages who developed the sacrificial technique.

12 यो वेद अनडुहो दोहान् सप्तानुपदस्वतः ।
प्रजां च लोकं चाप्नोति तथा सप्त ऋषयो विदुः ॥

13 तद्ब्रह्म च तपश्च सप्त ऋषय उपजीवन्ति ।

14 *Rahurkar*—The seers of the Ṛgveda (1964), p. 117.

15 आद्यतृचस्य भरद्वाज ऋषिः, द्वितीयस्य मारीचकाश्यपः, तृतीयस्य राहूगणो गोतमः, चतुर्थस्य भौमोऽत्रिः, पञ्चमस्य गाधिनो विश्वामित्रः, षष्ठस्य भार्गवो जमदग्निः, सप्तमस्य मैत्रावरुणिर्वसिष्ठः सूक्तशेषस्यांगिरसः पवित्रो वासिष्ठो वोभौ वा समुदितावृषी ।

16 Mankad, 'Date of Ṛgveda' p. 81.

शब्दार्थनिष्ठलिङ्गविमर्शः

रामनारायण त्रिपाठी
लखनऊ

लोके पुंस्त्वविशिष्टे धर्मिणि पुल्लिङ्गशब्दानां स्त्रीत्वविशिष्टे धर्मिणि स्त्रीलिङ्गशब्दानां नपुंसकत्वविशिष्टे धर्मिणि नपुंसकलिङ्गशब्दानां व्यवहारदर्शनादर्थनिष्ठमेव लिङ्गं प्रतिभाति। तद्विपरीतमेकस्मिन् स्त्रीरूपेऽर्थे स्त्रीदारकलत्रेति स्त्रीलिङ्गपुंल्लिङ्गनपुंसकलिङ्गशब्दाना-मेवमेकस्मिन्नात्मनि 'आत्मा चितिश्चैतन्यम्,' एकस्मिन्नेव पदार्थे 'अयं पदार्थः, इयं व्यक्तिः, इदं वस्तु' एकस्यां बुद्धौ 'बुद्धिः प्रत्ययो ज्ञानम्' एकस्मिन्तटे 'तटस्तटीतटम्' एकत्र देवे 'देवो देवता दैवतम्' इत्यादित्रिलिङ्गात्मकशब्दानां व्यवहारदर्शनाच्छब्दनिष्ठं लिङ्गमिति प्रतीयते। एवमुभयात्मकप्रतीतौ सत्यामर्थैक्ये शब्दभेदाल्लिङ्गान्यत्वस्य दर्शनाच्छब्दनिष्ठमेव लिङ्गं केचिदा[१]मनन्ति 'लिङ्गं शब्दवृत्त्येव शब्देन बोध्यते' इति। पदार्थनिष्ठे तु व्यक्त्यादिष्वपि पुंस्त्वेन परिच्छेदापत्तिः। तदपरे[२] न क्षमन्ते शब्दनिष्ठत्वे छागपदस्य निष्ठस्य लिङ्गस्य छागमात्रपरिच्छेदकत्वात् 'पशुना यजेत' इत्यछाग्यापि यागापत्तिः, घटशब्दनिष्ठस्य लिङ्गस्य घटमात्रपरिच्छेदकत्वाद् घटीतिरूपानापत्तिश्च अतोऽर्थनिष्ठं लिङ्गमिति।

एवं सति किञ्चिद् विचार्यते—सर्वजनसाधारणीयं कथा यल्लिङ्गमर्थनिष्ठमेव भवितु-मर्हति न तु शब्दनिष्ठं यतो हि स्त्रीपुरुषनपुंसकानां व्यक्तीनां द्योतकं यच्चिह्नं तत् तत्तद्-व्यक्तिषु परिलक्ष्यैव लोके इयं स्त्री, अयं पुरुषः, इदं नपुंसकम्, इति व्यवहारकथा प्रचलति। यद्यपि तच्चिह्नं तु स्त्रीपुंनपुंसकव्यक्तिवाचकेषु शब्देषु न संतिष्ठते तच्चिह्नधारायोग्यत्वा-च्छब्दानाम्, किन्तु तत्तल्लिङ्गवदर्थाभिधायित्वेन शब्देषु स्त्रीपुंनपुंसकताव्यवहारः।

अर्थवाचकत्वाभावेऽपि केवले शब्दे 'पुल्लिङ्गशब्दः' इत्यादिव्यवहारस्तु वाच्यवाचकयोर-भेदोपचारात् प्रवर्तते। ननु वाच्यवाचकयोरभेदाध्यवसायत्वेऽपि शशविषाणादेरत्यन्तासत्त्वेन तुच्छेऽलीके सति शशविषाणादिशब्देषु लिङ्गव्यवस्था न स्यादिति चेन्न बौद्धमर्थमादाय तद्वाचकत्वेन तत्र व्यवस्थापत्तेः। अथवा शास्त्रीयलिङ्गव्यवहारेण शब्दस्यापि त्रिगुणात्मका-हङ्कारपरिणामतया सत्त्वादीनामुपचयादिभिः केवले शब्देऽपि लिङ्गव्यवस्थापत्तेः, शशविषाणा-दावपि उत्तरपदार्थस्य सद्भावात् तद्द्वारकलिङ्गयोगाद् वा, अथवा यथा बौद्धविषयार्थवत्त्वेन यथा प्रातिपदिकत्वं तथा लिङ्गयोगोऽपि।

उक्तञ्चार्थनिष्ठत्वं लिङ्गस्य भाष्ये 'एकार्थे शब्दान्यत्वाद् दृष्टं लिङ्गान्यत्वम्', अवयवान्य-त्वाच्चेति........एकोऽयमर्थः स्त्रीत्वं नाम ४।१।३ तथा च कैयटः—

"अर्थधर्मत्वाल्लिङ्गस्य नपुंसकार्थाभिधायित्वादस्वास्थ्यादयो नपुंसकशब्देनाभिधीयन्त इत्यर्थग्रहणमेव भवति" ७।१।२३ शेखरकारादिभिरपि सर्वैः स्वस्वग्रन्थेषु समर्थितमेतद्।

नन्वेवं लिङ्गस्यार्थनिष्ठत्वे 'अलिङ्गे युष्मदस्मदी' ७।१।३३ युष्मदस्मच्छब्दरूपेऽलिङ्गे, इत्यर्थकं वार्तिककृतोक्तं कथं संगच्छेत युष्मदस्मदादेर्द्रव्यवाचित्वाद् द्रव्यस्य च लिङ्गसंख्यासंबन्धाल्लिङ्गयोग आवश्यकः ? अनयोर्हि योऽर्थः स लिङ्गरहितः शब्दशक्तिस्वाभाव्याल्लिङ्गरहित एवार्थस्ताभ्यामभिधीयते पश्चादर्थेन संबध्यते एवमभिधेयस्यालिङ्गत्वात् तद्वाचकशब्दयोरप्यलिङ्गत्वाद् 'अलिङ्गे युष्मदस्मदी' इत्युक्तम् ।

ननु लिङ्गस्यार्थनिष्ठत्वे स्त्रीरूपार्थवाचकदारकलत्रादिशब्देषु तदर्थवाचकत्वात्तल्लिङ्गत्वोपपत्तौ युक्तायां कथं पुंलिङ्गादिव्यवहार इति चेन्न सत्यप्यर्थे लौकिकस्त्रीलिङ्गे तद्भिन्नशास्त्रीयलिङ्गबोधकत्वात् तत्तद्व्यवहारोपपत्तेः एवं कस्यचिदर्थस्य लिङ्गत्रयबोधकत्वं कस्यचिच्च लिङ्गद्वयबोधकत्वं शास्त्रीयलिङ्गबोधकत्वादेवोपपद्यते । अर्थनिष्ठशास्त्रीयलिङ्गवैविध्यवाचकत्वात् तटादिशब्देषु लिङ्गानेकत्वं प्रवर्तते । एतच्च शास्त्रीयलिङ्गज्ञानं लिङ्गानुशासनात् कोशाल्लोकव्यवहाराच्च ज्ञायते ।

The volume under review consists of four sections. The first one, called Sanskrit Philology, includes four articles : (1) Sanskrit Language and Indian Culture, (2) Sanskrit Semantics, (3) On the words Kāhalā and Kirāṭa and (4) Sanskrit originals of a few Hindi and Panjabi words. The second section presents textual criticism in two articles : (1) The text of the Dik and the Kālasamuddeśas of the Vākyapadīya and its commentary and (2) The Indudūta of Vinayavijayagaṇi—a Textual Study. Sanskrit Literature is the caption of the third section which offers (1) The story of Udayana and Vāsavadattā through the ages, (2) Poetry in the Vāmana Purāṇa, (3) A Critical Study of the Sanskrit Dūtakāvyas and (4) The Anyoktis in the Vāsiṣṭha Rāmāyaṇa. The fourth and the last section has for its subject matter Indian Philosophy and deals with (1) Conception of time in Post-Vedic Sanskrit Literature, (2) Conception of Space in the Vākyapadīya and (3) Conception of Daiva and Puruṣakāra in the Vālmīki and Vāsiṣṭha Rāmāyaṇaṣ

All the articles, except two, were published in various Indological journals. They, however, have partly been re-written and fresh matter has been added in a number of cases. The studies on the Conception of Time and the Dūtakāvyas are new additions. The former is well-documented and thorough in execution. Long ago, a similar study in Sanskrit was presented by Pandit Haran Chandra Sastri of Varanasi in his Kālasiddhāntadarśinī. In Dūtakāvyas also, several scholars, notably Prof. Chintaharan Chakravarti and Dr. Jatindravimal Chaudhuri made very important contributions. The learned author, however, does not indicate if he has utilised any of these contributions. The section on Philology and textual criticism are informative.

The publication adds much to our knowledge and is expected to be well-received by scholars.

KĀLIDĀSA'S VISION OF KUMĀRASAMBHAVA by Dr. Suryakanta, M. A., D. Litt. (Pb), D. Phil (Oxon), Officer d' Academic (Francaise), published by Sri Sudarshan Kumar, Sri Bharata Bharati Press, Delhi-6, 1963, pp i-xiii+1—150 Price Rs. 20/-

---

Reviewed by Dr. Anant Lal Thakur, Vaishali Institute, Vaishali, Bihar

---

In the present work, the learned author has dealt with several problems connected with the Kumārasambhava of Kālidāsa. The first chapter, in a nut-shell, gives the story of the Kumārasambhava. The second presents a comparative study of the story based on the Pauranic, Epic and Vedic traditions. The poetic Philosophy and the vision of Kālidāsa have respectively been dealt with in chapters III and IV. The fifth offers the unique significance of the Kumārasambhava while the etymology and significance of the word Kumāra are discussed in chapter VI. The authenticity of the latter half of the poem forms the subject-matter of chapter VII. The eighth and the last chapter deals with Kālidāsa as the priest of integration. Besides, there is a short preface and an appendix. In the latter we get the original Sanskrit texts relating to the marriage of Śiva and Pārvatī and the birth and exploits of Kumāra-Kārtikeya who has been viewed as a national hero.

Of all the extant works of Kālidāsa, the Kumārasambhava has suffered most. It has partially been ignored by the commentators and copyists. And in course of time doubt arose with regard to the authenticity of the last nine cantos. The learned Doctor has done well to focus the specialities of the poem. Its back-ground in Indian literature has received adequate attention. In course of its evaluation he has compared and contrasted the poem with kindred works of the world literature. The views are thought-provoking though all the conclusions may not be equally acceptable.

One misses a sketch of the development of Kālidāsa's poetic genius based upon a comparison and contrast of his successive works. There are suggestions here and there about it. But a detailed treatment from the point of view of the learned author would have been appreciated. Comparative silence and occasional adverse criticism of the poem by literary critics also deserved adequate notice.

सूचनायें :
INFORMATIONS

I

The first issue of this Journal was released by Dr. B. Gopala Reddi, Governor of Uttar Pradesh and a distinguished Member of the Parishad on July 31, 1969 at a function specially held for the purpose. On the same occasion the Parishad felicitated Dr. Satyavrat Śāstri of the Delhi University for receiving the Sahitya Akademi prize of Rs. 5,000 on his book 'Śrigurugovindasiṁhacaritam'. Another eminent Sanskrit scholar Pt. Charu Deva Śāstri was also honoured on this occasion. A Sanskrit kavisammelana was also organised in this connection, in which reputed Sanskrit poets belonging to Varanasi and other places participated.

II

The Parishad has been recognised by the University of Kanpur as its Centre of Research for Ph.D. and D.Litt. degrees in Sanskrit. The Research Centre run by the Parishad has for its Director a very eminent scholar in the person of Prof. K. A. S. Iyer. The scholars doing research in the Parishad have the advantage of its well-equipped Library and a collection of about 8,000 manuscripts.

III

Swami Krishnananda Saraswati of Mauritius was kind enough to visit the Parishad and deliver a lecture on the 'State of Sanskrit studies in foreign Countries'.

IV

परिषद् द्वारा आयोजित व्याख्यानमाला में गत वर्षार्द्ध में दश व्याख्यान हुये, जिनमें से निम्नलिखित विशेष रूप से महत्वपूर्ण थे—

१. विदेशों में संस्कृत की स्थिति—मारिशस निवासी स्वामी कृष्णानन्द सरस्वती ।

२. पुरुषोत्तम कृष्ण की मूर्तियां
३. पश्चिमोत्तर देशों में ब्राह्मण मूर्तिकला (पूर्वार्द्ध)
४. पश्चिमोत्तर देशों में ब्राह्मण मूर्तिकला (उत्तरार्द्ध)

(२–४) उत्तर प्रदेश राज्यसङ्ग्रहालय के निदेशक डा० नीलकण्ठ पुरुषोत्तम जोशी

५. सिंहल में रामकथा—भिक्खु के० चन्दरतन

V

Dr. H. C. Joshi, a member of the Editorial Board of this Journal has been appointed as Professor of Sanskrit at Kathmandu (Nepal) under the Indian Cooperation Mission.

VI

Shri Gopal Chandra Sinha, Secretary of the Akhila Bharatiya Sanskrit Parishad, Lucknow and a member of the Editorial Board of this Journal has been nominated by the Chancellor, Vārāṇaseya Sanskrit Viśvavidyālaya as a member of its Executive Council.

VII

The Parishad has decided to present a Felicitation Volume to Prof. K. A. S. Iyer, its first President, the Director of the Research Centre run by the Parishad, a member of the Parishad's Executive Committee as well as of the Editorial Board of this Journal and, above all, a Sanskrit Scholar of international repute.

VIII

The Kendrīya Sanskrit Vidyāpeeṭha at Tirupati has undertaken the tape-recording of the recitation of the Vedas in the age-long traditional manner.

IX

On the occasion of the 22nd Independence Day the Acting President honoured the following Sanskrit Scholars by presenting them with a scroll of honour : (1) Swāmī Brahmaleenamuni, (2) Venktachala Shastri, (3) D. D. Kavīśvara, (4) A. Subbiah Shastri, (5) R. V. Subrahmanya Shastrigal and (6) Acharya Bhagavan Deva. Besides the scroll of honour, these scholars will get an annual grant of Rs. 1,500.00 for life.

X

Dr. Herbert Hartel, Professor of Indian Art and Archaeology, Free University, Berlin and Director of Berlin Museum of Indian Art has been newly enrolled as a Sammānya Pāriṣada of the Parishad. The Parishad is grateful to him for having accepted its request.

XI

वित्तीय वर्ष १९६९-७० ई० में उत्तर प्रदेश शासन द्वारा डा० मङ्गलदेव शास्त्री को रु० ५,०००.०० का संस्कृत विशिष्ट पुरस्कार मिला है तथा संस्कृत अथवा संस्कृत से सम्बन्ध रखने वाले निम्नलिखित ग्रन्थ पुरस्कृत हुए हैं—

क्रम सं०	ग्रन्थ	रचयिता	पुरस्कार	धनराशि
१	नित्यषोडशिकार्णवः	श्रीव्रजबल्लभ द्विवेदः, व्याख्याता, योगतन्त्र विभाग, वाराणसेय संस्कृत विश्वविद्यालय, वाराणसी।	कालिदास पुरस्कार	रु० १,५००.००
२	सूर्यप्रभा किंवा वैभव-पिशाचः	श्री श्रीनिवास शास्त्री	गंगानाथ झा पुरस्कार	रु० १,०००.००
३	संस्कृत-शिक्षण की नवीन योजना	डा० धर्मेन्द्रनाथ शास्त्री, 'ऋतम्' के सम्पादकमण्डल के सदस्य	डा०भगवानदास पुरस्कार	रु० १,०००.००
४	श्री हरिसम्भवमहा-काव्यम्	टीकाकार—श्री भोलानाथ शास्त्री, द्वारा श्री श्वेत-वैकुण्ठदास स्वामीनारायण-मन्दिर, मछोदरी बाग, वाराणसी	संस्कृत-सम्बन्धी विविध पुरस्कार	रु० ५००.००
५	वैद्यकीयसुभाषित-साहित्यम्	डा० भास्कर गोविन्द धाणेकर, शेवड़े लेन, भिजेवाडा, १४३६, शुक्रवारपेठ, पुणे-२	,,	रु० ५००.००
६	जवाहरलालनेहरू-विजयनाटकम्	श्रीरमाकान्तमिश्र, प्रधाना-ध्यापक, जा० संस्कृत विद्यालय, नरकटियागंज, चम्पारण, बिहार	,,	रु० ५००.००
७	अशोकमल्लविरचित-नृत्याध्याय	श्रीवाचस्पति गोरोला-३३/६, करेलाबाग कालोनी इलाहाबाद-३	,,	रु० ५००.००

क्रम संख्या	ग्रन्थ	रचयिता	पुरस्कार	धनराशि
८	आचार्यदण्डी एवं संस्कृत-काव्यशास्त्र का इतिहास-दर्शन	डा० जयशंकर त्रिपाठी, लोकभारती प्रकाशन, १५ ए, महात्मागांधी मार्ग, इलाहाबाद	हिन्दी सम्बन्धी विविध पुरस्कार	रु० ५००.००
९	गरुडपुराण (एक अध्ययन)	डा० अवधविहारी लाल अवस्थी, रीडर, प्राचीन भारतीय इतिहास एवं पुरातत्त्व विभाग, लखनऊ विश्वविद्यालय, लखनऊ	,,	रु० ५००.००
१०	हमारे पुराने नगर	डा० उदयनरायण राय, रीडर, प्राचीन इतिहास, संस्कृति एवं पुरातत्त्व विभाग, प्रयाग विश्व-विद्यालय, इलाहाबाद	,,	रु० ५००.००
११	महिमभट्ट	डा० ब्रजमोहन चतुर्वेदी, संस्कृत विभाग, दिल्ली विश्वविद्यालय, दिल्ली	,,	रु० ५००.००
१२	पौराणिक धर्म एवं समाज	श्री सिद्धेश्वरी नारायण राय, प्राध्यापक, प्राचीन इतिहास, संस्कृति एवं पुरातत्त्व विभाग, प्रयाग विश्वविद्यालय, इलाहाबाद	,,	रु० ५००.००
१३	आदिपुराण में प्रति-पादित भारत	डा० नेमिचन्द्र शास्त्री, अध्यक्ष, संस्कृत-प्राकृत विभाग, एच० डी० जैन कालेज, आरा (मगध विश्वविद्यालय), विहार	,,	रु० ५००.००

क्रम संख्या	ग्रन्थ	रचयिता	पुरस्कार	धनराशि
१४	प्राचीन भारतीय कला एवं संस्कृति	डा० राजकिशोर सिंह तथा श्रीमती उषा यादव, २८/४६८, गोकुलपुरा, आगरा	हिन्दी-सम्बन्धी विविध पुरस्कार	रु० ५००.००

XII

संयुक्त राष्ट्र अमरीका के मिशिगन राज्यीय विश्वविद्यालय में एशियाई रंगमंच के प्राध्यापक डा० फार्ले रिचमण्ड, जिनके भारत आगमन की पूर्व सूचना 'ऋतम्' के पिछले अंक में दी गयी थी, अगस्त १६६६ में भारत आ गये। यहां वे मुख्यतः बम्बई में ठहरे हुए हैं किन्तु संस्कृत नाटकों को प्रस्तुत करने की विधियों का अध्ययन करने के लिए वे भारत भर में भ्रमण करते रहे हैं।

डा० रिचमण्ड का कहना है कि संस्कृत नाटकों के प्रस्तुतीकरण में पुराना ढंग ही अपनाया जाना चाहिए। उदाहरणार्थ दीप के स्थान पर बिजली के बल्ब का प्रयोग नहीं होना चाहिए।

[अमेरिकन रिपोर्टर में प्रकाशित एक लेख के आधार पर, साभार]

XIII

कु० राबर्ट कान, जो बुकलिन कालेज, न्यूयार्क की स्नातिका और पेन्सिलवेनिया विश्वविद्यालय प्राच्यविद्या विभाग की स्नातकोत्तर छात्रा हैं, भारतीय संस्कृति के अध्ययन और तद्विषयक शोध के अभिप्राय से भारत आयी हुई हैं। कु० कान ने संस्कृत के प्रसिद्ध विद्वान् प्रोफेसर नार्मन ब्राउन के निर्देशन में संस्कृत का अध्ययन किया है और इस समय 'कल्किपुराण' का विशेष अध्ययन कर रही हैं। कु० कान गत जून मास में भारत आयी हैं और इस समय कलकत्ते में ठहरी हुई हैं।

[अमेरिकन रिपोर्टर में प्रकाशित एक लेख के आधार पर, साभार]

शोकोद्गार
OBITUARY

यह वर्षार्द्ध जहां परिषद् की उपलब्धियों के लिये महत्वपूर्ण रहा है वहां उसकी एक ऐसी क्षति भी हुई है जिसकी पूर्ति होनी कठिन है। परिषद् के प्रचारमन्त्री श्रीमान् पं० कृष्ण कुमार तिवारी का निधन ७ सितम्बर, १९७० को लखनऊ में हो गया। इस समय उनकी अवस्था ७५ वर्ष थी। तिवारी जी अपने पीछे एक भरा पूरा परिवार और सुहृत्समाज छोड़ गये हैं।

पं० कृष्ण कुमार तिवारी का जन्म १५ अक्टूबर, १८९५ ई० को हुआ था। अध्ययन समाप्त करने के पश्चात् उन्होंने राज्य शिक्षा सेवा में प्रवेश किया जहां से वह जिला विद्यालय निरीक्षक के पद से निवृत्त हुये। अपनी सूझबूझ और कर्मठता के फलस्वरूप तिवारी जी ने तत्कालीन शासन से रायसाहब की उपाधि प्राप्त की थी। अपने जीवन के अन्तिम काल तक तिवारी जी अनेक शिक्षा संस्थाओं से सम्बद्ध रहे।

परिषद् पुस्तकालय के स्थापना-काल से ही तिवारी जी परिषद् से घनिष्ट रूप से सम्बद्ध रहे हैं। वह पुस्तकालय के नियमित पाठकों में थे। उर्दू-फारसी के विद्वान् होते हुये भी उन्होंने स्वाध्याय तथा अपने अध्यवसाय से संस्कृत का जो ज्ञानार्जन कर लिया था वह सभी के लिए अनुकरणीय है। तिवारी जी को निरन्तर परिषद् के हित का ध्यान रहा करता था। परिषद् के प्रचारमन्त्री के रूप में उन्होंने जो कार्य किया है उसके लिये यह परिषद् उनकी चिरऋणी रहेगी।

हम तिवारी जी के प्रति नतमस्तक हो कर अपनी श्रद्धासुमनाञ्जलि समर्पित करते हैं।

NĀRĀYAṆA PAṆḌITA'S

BĪJAGAṆITĀVATAṀSA

PART I

श्री नारायणपण्डितविरचितः

बीजगणितावतंसः

प्रथमो भागः

Critically Edited

by

KRIPA SHANKAR SHUKLA

Reader in Mathematics

University of Lucknow

Published by

AKHILA BHARATIYA SANSKRIT PARISHAD

LUCKNOW

1970

CONTENTS

ERRATA

Page	Line	Inccorrect	Correct
iii	19	°निहितमना शारदायाः	°निहितमनाः शारदाया
1	11	प्रश्ना न खिलीभिवन्ति	प्रश्नानखिलीभवन्ति
32	13	सम्भक्तो	सप्तभक्तो

INTRODUCTION

The *Bījagaṇitāvataṁsa* comes from the pen of Nārāyaṇa Paṇḍita and deals with algebra. The name *Bījagaṇitāvataṁsa* is a compound formed by the composition of the words *bījagaṇita*, meaning "algebra" (lit. "the science of calculation with elements"), and *avataṁsa*, meaning "a garland or any ring-shaped ornament", or "the crown." *Bījagaṇitāvataṁsa* thus means "a garland of the elements of algebra" or "the crown of algebra".

Like other Hindu works on algebra, it is divided into two parts, Part I dealing with algebraic processes essential in solving algebraic equations (*bījopayogi-gaṇita*) and Part II dealing with algebraic equations (*bīja*). An incomplete manuscript of the work containing the whole of Part I and a few opening lines of Part II, which was acquired by the late Dr A. N. Singh, belongs to our collection. In the current issue of the *Ṛtam* we propose to present a critically edited text of Part I. An English translation along with critical and explanatory notes will appear in a subsequent issue. Part II of the work is not available at present in its complete form and the reader will have to wait for it until a complete manuscript of the work is discovered.

Part I sets forth the following three topics:

(i) Algebraic operations (of addition, subtraction, multiplication, division, squaring and extracting the square root) for each of the following :

Positive and negative numbers (*dhanarṇa*), the zero (*śūnya*), single unknown (*avyakta*), more unknowns characterized by colours (*varṇa*), and surds (*karaṇī*).

(ii) The Pulverizer (*kuṭṭaka*), i. e., analysis pertaining to the indeterminate equation $(ax \pm c)/b = y$.

(iii) The Square-nature (*varga-prakṛti*), i. e., analysis pertaining to the indeterminate equation $Nx^2 \pm C = y^2$.

From the opening lines of Part II in our manuscript, we learn that it dealt as usual with the following algebraic equations (*bīja*) :

(i) Linear equations in one unknown (*avyakta-samīkaraṇa*).

(ii) Linear equations in more than one unknown (*varṇa-samatva*).

(iii) Elimination of the middle term (*madhyamāharaṇa*), or the quadratic equation.

(iv) Equations involving the product of different unknowns (*bhāvita-samatva*).

Our manuscript breaks off after giving the list of contents of Part II and an example of a linear equation in one unknown.

Part I ends with the following colophon giving the name of the author as Nārāyaṇa Paṇḍita and that of his father as Narasiṁha :

इति सकलकलानिधिनरसिंहनन्दन-गणितविद्याचतुरानन-नारायणपण्डितविरचिते बीज-गणितावतंसे वर्गप्रकृतिः समाप्ता ।

Comparison of this colophon with the following ones occurring at the ends of the various sections of the *Gaṇita-kaumudī* leaves little doubt that the author of the *Bījagaṇitāvataṁsa* was the same Nārāyaṇa Paṇḍita as the author of the *Gaṇita-kaumudī*.

(i) इति सकलकलानिधिनरसिंहनन्दन-गणितविद्याचतुरानन-श्रीनारायणपण्डितविर-चितायां गणितपाट्यां कौमुद्यां प्रकीर्णकानि समाप्तानि ।

(ii) इति सकलकलानिधिनरसिंहनन्दन-गणितविद्याचतुरानन-नारायणपण्डितविर-चितायां गणितकौमुद्यां मिश्रव्यवहारः ।

(iii) इति सकलकलानिधिनरसिंहनन्दन-गणितविद्याचतुरानन-नारायणपण्डितविर-चितायां गणितकौमुद्यां श्रेढीव्यवहारः ।

(iv) इति सकलकलानिधिनरसिंहनन्दन-गणितविद्याचतुरानन-नारायणपण्डितविर-चितायां गणितपाट्यां कौमुद्याख्यायां क्षेत्रव्यवहारः समाप्तः ।

(v) इति सकलकलानिधिनरसिंहनन्दन-गणितविद्याचतुरानन-नारायणपण्डितविर-चितायां गणितपाट्यां कौमुद्याख्यायां कुट्टको नाम नवमः व्यवहारः समाप्तः ।

(vi) इति श्रीसकलकलानिधिनरसिंहनन्दन-गणितविद्याचतुरानन-नारायणपण्डितविर-चितायां गणितपाट्यां कौमुद्याख्यायां वर्गप्रकृतिर्नाम दशमोऽध्यायः समाप्तः ।

(vii) इति श्रीसकलकलानिधिनरसिंहनन्दन-गणितविद्याचतुरानन-नारायणपण्डितविर-चितायां गणितपाट्यां कौमुद्याख्यायां भागादानं नामैकादशो व्यवहारः समाप्तः ।

(viii) इति श्रीसकलकलानिधिनरसिंहनन्दन-गणितविद्याचतुरानन-नारायणपण्डितविरचितायां गणितपाट्यां कौमुद्याख्यायां रूपाद्यंशावतारो नाम द्वादशो व्यवहारः ।

(ix) इति श्रीसकलकलानिधिनरसिंहनन्दन-गणितविद्याचतुराननन-नारायणपण्डितविरचितायां गणितकौमुद्याख्यायामङ्कपाशो नाम त्रयोदशो व्यवहारः ।

(x) इति श्रीसकलकलानिधिश्रीमन्नृसिंहनन्दन-गणितविद्याचतुरानन-नारायणपण्डितविरचितायां गणितपाट्यां भद्रगणितं नाम चतुर्दशो व्यवहारः ।

The identity of the authors of the *Bījagaṇitāvataṁsa* and the *Gaṇita-kaumudī* is also established by the fact that most of the verses (including commentaries thereon) found in the sections dealing with *Kuṭṭaka* and *Varga-prakṛti* in the two works are almost literally the same. There is also a reference in the *Gaṇita-kaumudī*[1] to the author's *Bījagaṇita*.

The following verse occurring in the end of the author's *Gaṇita-kaumudī* shows that the author's father Narasiṁha (Sk. Nṛsiṁha) was a respectable Brāhmaṇa well versed in Śrutis and Smṛtis and a devotee of God Śiva; and that besides being a good scholar of the Śāstras, he had acquired a high degree of proficiency in the mechanical science, the science of arms, and logic.

आसीत् सौजन्यदुग्धाम्बुधिरवनिसुरश्रेणिमुख्यो जगत्यां
प्रख्यः श्रीकण्ठपादद्वयनिहितमना शारदायाः निवासः ।
श्रौतस्मार्तार्थवेत्ता सकलगुणनिधिः शिल्पविद्याप्रगल्भः
शास्त्रे शस्त्रे च तर्के प्रचुरतरगतिः श्रीनृसिंहो नृसिंहः ॥[2]

Nārāyaṇa Paṇḍita lived in the fourteenth century of the Christian era. The following concluding verse of the *Gaṇita-kaumudī* shows that the *Gaṇita-kaumudī* was completed on Thursday, the second *tithi* of the dark fortnight of the month Kārtika, Samvatsara Durmukha, Śaka year 1278. This corresponds to Thursday, October 14, A. D. 1356. The *Bījagaṇitāvataṁsa* which is mentioned in the *Gaṇita-kaumudī* was evidently written prior to this date.

गजनगरविमितशाके दुर्मुखवर्षे च बाहुले मासि ।
धातृतिथौ कृष्णदले गुरौ समाप्तिं गतं गणितम् ॥

---

[1] *GK* (=*Gaṇita-kaumudī*), Part I, p. 13, lines 15-17.
[2] *GK*, Part II, p. 410.

The *Gaṇita-kaumudī* and the *Bījagaṇitāvataṁsa* are the only two works on mathematics written by Nārāyaṇa Paṇḍita. The *Gaṇita-kaumudī* was edited by the late Padmakara Dvivedi and published in two parts, which appeared as No. 57 (Part I) and No. 57 (Part II) of the Princess of Wales Saraswati Bhavana Texts from Banaras in 1936 and 1942 respectively. Part I of the *Bījagaṇitāvataṁsa* is being published now for the first time.

The above works show that their author Nārāyaṇa Paṇḍita was a good mathematician. He introduced new subjects of treatment and made his own contributions to the existing ones. He is the first mathematician to have dealt with the subject of "Magic Squares". Some of his contributions are indeed remarkable and deserve special credit. In a paper entitled "Hindu methods for finding factors or divisors of a number"[1] I have shown that the so called Fermat's factorization method was given by Nārāyaṇa in the *Gaṇita-kaumudī* about three centuries before it struck the mind of the French mathematician. There are quite a few problems which were proposed and solved for the first time by Nārāyaṇa. For example, mention may be made of the following :

> "A cow gives birth to a calf every year. The calves become young and themselves begin giving birth to calves when they are three years old. Tell me, 0 learned man, the number of progeny produced during twenty years by one cow."[2]

One who goes through the present work will find that the alternative method for finding the square root of a surd[3] of the type $a+\sqrt{b}+\sqrt{c}+\sqrt{d}$ as given in Rule 46-49 and that for finding the approximate value of a quadratic surd as given in Rule 88 were given by Nārāyaṇa Paṇḍita for the first time.

I am grateful to Shri G. C. Sinha, Secretary, Akhila Bharatiya Sanskrit Parishad, Lucknow, for his keen interest in the present publication. My thanks are also due to Shri Markandeya Misra, Jyautishacharya, Research Assistant, Department of Mathematics and Astronomy, Lucknow University, for making the press copy of the manuscript.

K. S. Shukla

---

1 *Gaṇita*, Vol. 17, No. 2, 1966, pp. 101-109.

2 *GK*, Part I, p. 126.

3 For a comparative study of the Hindu methods relating to surds, see A. N. Singh, "On the arithmetic of surds among the ancient Hindus," *Mathematica*, Vol. XII, 1936, pp. 102-115.

श्रीनारायणपण्डितविरचितः

बीजगणितावतंसः

एकमनेकस्योक्तं (नित्यं) व्यक्तस्य गुणवतो जगतः ।
गणनाविधेश्च बीजं ब्रह्म[1] च गणितं च तद् वन्दे ॥ १ ॥

अजगोलोऽयमियानिति करकलितामलकसन्निभो येन ।
व्यक्तीचक्रे ह्यगणितगणितेन (च) तत् किमस्त्यन्यत् ॥ २ ॥

गणितमिति नाम लोके ख्यातमभूदगणितस्य शास्त्रस्य ।
अगणितविक्रमविष्णोस्त्रिविक्रमश्चेति नामेव ॥ ३ ॥

सद्गुरुकृपयाऽनुभवैरभ्यासैः परमतत्त्वमिव योगी ।
यो वेत्ति कर्म साङ्ख्यं स भवति सङ्ख्यावतां धुर्यः ॥ ४ ॥

यो यो यं यं प्रश्नं[2] पृच्छति सम्यक्करणं न तस्यास्ति ।
व्यक्तेऽथाव्यक्ते तु प्रायस्तत्करणमस्त्येव[3] ॥ ५ ॥

व्यक्तक्रियया ज्ञातुं प्रश्ना न खिलीभिवन्ति[4] नाल्पधियः ।
बीजक्रियां च तस्माद् वच्मि व्यक्तां सुबोधां च ॥ ६ ॥

---

१ ब्रह्मे । २ यं यः प्रश्नः । ३ °मस्सेव ।
४ ज्ञातुं प्रश्नान्यखी भ° ।

[बीजोपयोगि-गणितम्]

(१) षट्त्रिंशत् परिकर्माणि

(i) धनर्णषड्विधम

धनर्ण[1]सङ्कलिते करणसूत्रमार्याद्वयम्—

रूपाणामव्यक्तानां नामाद्यक्षराणि लेख्यानि।
उपलक्षणाय तेषामृणगानामूर्ध्वबिन्दूनि ॥ ७ ॥

योगे धनयोः क्षययोर्योगः स्यात् स्वर्णयोर्भवेद् विवरम्[2]।
अधिकाद्धूनमपास्य च शेषं तद्भावमुपयाति ॥ ८ ॥

उदाहरणम्—

रूपत्रयञ्च रूपकपञ्चकमस्वं धनात्मकं वाऽपि।
वद सहितं झटिति सखे स्वर्णमृणं स्वं च यदि वेत्सि[3]। १ ॥

न्यासः— रू ३ रू ५ । अत्र धनयोर्योगे योग इति योगे जातं रू ८ ।

न्यासः — रू ३̇ रू ५̇ । ऋणयोर्योगे योग इति जातं योगे रू ८̇ ।

न्यासः — रू ३ रू ५̇ । स्वर्णयोर्विवरमिति जातमृणभावं शेषं रू २̇ । अयं योग एव ।

न्यासः — रू ३̇ रू ५ । स्वर्णयोर्विवरमिति जातं धनभावं शेषं रू २ । अयं योग एव । एवं भिन्नेष्वपि ।

इति धनर्णसङ्कलनम् ।

धनर्णव्यवकलने सूत्रमार्यार्धम्—

स्वमृणत्वमृणं स्वत्वं शोधकराशेः समुक्तवद्योगः ।

उदाहरणम्—

रूपाष्टकं रूपकपञ्चकेन[4]
क्षयं क्षयेनापि धनं धनेन ।
धनं क्षयेण क्षयगं धनेन
व्यस्तं च संशोध्य वदाशु[5] शेषम् ॥ २ ॥

---

[1] धनार्णं । [2] °वर्णयो° । [3] स्वर्णमृणं च यदि वेसि । [4] रूपकं प° । [5] वदाश्रु ।

न्यासः — रू ८̇ रू ५̇ । अत्र शोधके[1] ऋणं स्वत्वमिति[2] जातं स्वं रू ८̇ रू ५ । प्राग्वद्योगे जातं रू ३̇ । एतच्छेषम् ।

न्यासः — रू ८ रू ५ । स्वमृणत्वमिति जातमृणत्वं रू ८ रू ५̇ । प्राग्वद्योगे जातं रू ३ ।

न्यासः — रू ८ रू ५̇ । ऋणं स्वत्वमिति जातं स्वं रू ८ रू ५ । प्राग्वद्योगे जातं रू १३ ।

न्यासः — रू ८̇ रू ५ ।[3] स्वमृणत्वमिति जातमृणत्वं रू ८̇ रू ५̇ । प्राग्वद्योगः रू १३̇ । एतदन्तरम् ।

इति धनर्णव्यवकलना ।

अथ धनर्णगुणने सूत्रमार्यार्धम्—

ऋणयोर्धनयोर्घाते स्वं स्याद्गुणधनहतावस्वम् ॥ ९ ॥

उदाहरणम्—

रूपद्वयं रूपकपञ्चकेन
धनं धनेन क्षयगं क्षयेण ।
धनं क्षयेण क्षयगं धनेन
निघ्नं पृथक् किं गुणने फलं स्यात् ॥३॥

न्यासः — रू २ रू ५ गुण्यगुणकौ[4] । धनयोर्घाते स्वं स्यादिति जातं रू १० ।

न्यासः — रू २̇ रू ५̇ । ऋणयोर्घाते[5] स्वं स्यादिति जातं धनं रू १० ।

न्यासः — रू २ रू ५̇ । ऋणधनहतावस्वमिति जातं रू १०̇ ।

न्यासः — रू २̇ रू ५ । प्राग्वज्जातमृणं रू १०̇ । एवं भिन्नेष्वपि ।

इति धनर्णगुणना ।

धनर्णभागहारे सूत्रम्—

ऋणधनगुणने यच्चोपलक्षणं तच्च भागहरणेऽपि ।

---

१ अत्र शोध अत्रशोधके । २ स्वमृणत्वमिति । ३ रू ८ रू ५ ।
४ गुणागुणकौ । ५ ०योद्याते ।

उदाहरणम्—

द्विनिघ्नरूपत्रितयं द्विकेन
धनं धनेनर्णमृणेन भक्तम्[१] ।
ऋणं धनेन स्वमृणेन वापि
सखे वदाश्वत्र[२] हृतौ फलं मे ।।४।।

न्यासः — रू ६ रू २। अत्र गुणने[३] यच्चोपलक्षणमिति यथा धनयोर्घाते धनं तथा धनयोर्भजने धनमिति भागे हृते जातं रू ३ ।

न्यासः — रू ६̇ रू २̇ । भागे हृते जातं रू ३ ।

न्यासः — रू ६̇ रू २ । गुणनवद् भागे हृते जातं रू ३̇ ।

न्यासः — रू ६ रू २̇ । भागे हृते जातं रू ३̇ ।

इति धनर्णभागहारः ।

धनर्णवर्गवर्गमूलयोः करणसूत्रम्—

ऋणधनयोश्च कृतिः स्वं धनमूलं धनमृणं भवेद्वापि ।
अकृतित्वादृणराशेर्मूलं नास्त्येव सिद्धमिति ।। १० ।।

उदाहरणम्—

सखे चतुर्णामधनात्मकानां[४]
धनात्मकानाञ्च[५] कृतिं वदाशु[६] ।
धनस्य रूपद्विगुणाष्टकस्य
क्षयस्य वा मित्र पृथक्पदं किम् ।।५।।

न्यासः — रू ४̇, रू ४ । जातौ वर्गौ १६, १६ ।

न्यासः — रू १६ । जातं मूलं रू ४, अथवा मूलं रू ४̇ ।

न्यासः — रू १६̇ । अस्य क्षयगतस्य राशेरकृतित्वान्मूलं नास्तीति सिद्धम् ।

इति धनर्णवर्गमूले[७] ।

इति धनर्णषड्विधम् ।

---

१ धनं धनेनर्णम् । २ °दाश्च° । ३ °नेन । ४ °मधुना° ।
५ अनात्मकाना धनात्मका° । ६ °दाश्रु । ७ मुले ।

(ii) शून्यषड्विधम्

शून्यसङ्कलितव्यवकलितयोः करणसूत्रम्—

स्वर्ण[1] शून्येन युतं विवर्जितं वा तथैव तद् भवति।
शून्यादपनीतं तत् स्वर्णं व्यत्यासमुपयाति[2] ॥ ११ ॥

उदाहरणम्—

रूपपञ्चकमृणं धनं सखे
खेन युक्तमथवा विवर्जितम्।
शून्यतः पृथगपास्य तानि वा
किं भवेद् गणक मे पृथग्वद ॥ ६ ॥

न्यासः[3] — रू ५̇, रू ५। एतानि खेन युतान्यूनितान्यविकृतानीव।

न्यासः — रू ५̇, रू ५। एतानि शून्यतश्च्युतानि जातानि व्यस्तानि[4] रू ५ रू ५̇,।

इति शून्यसंकलनव्यवकलने।

[शून्यगुणने सूत्रमार्यार्धम्[5]—

खं राशिना विगुणितं खं स्याद्राशिः खगुणश्च खं भवति।

उदाहरणम्

धनर्णभूतैस्त्रिभिरेव सङ्गुणं
खं किं फलं स्यात्कथयाशु तन्मे।
धनात्मकाश्चाप्यधनात्मकास्त्रयः
खसंगुणाश्चापिफलं प्रचक्ष्व ॥

न्यासः — गुण्यः रू ०, गुणकः रू ३, रू ३̇। गुणने जातमुभयोः फलम् रू०।

न्यासः — गुण्यः रू ३, रू ३̇। गुणकः रू ०। गुणने जातमुभयोः फलम् रू ०।

इति शून्यगुणनाविधिः।]

---

१ स्वर्णं। २ °समुत्व°। ३ सेः न्यो। ४ व्यक्तानि।

५ The portion enclosed within [ ] does not form part of the text. It is added to complete the text.

शून्यभागहरणादौ सार्धमार्यासूत्रम्—

खगुणादौ सूत्रम्—

खं राशिना विभक्तं खं स्याद्राशिः खभाजितः खहरः ॥ १२ ॥
शेषविधौ सति खगुणश्चिन्त्यः[१] शून्ये गुणे खहारश्चेत्[२] ।
पुनरेव तदाविकृतो राशिर्ज्ञेयोऽत्र मतिमद्भिः ॥ १३ ॥

उदाहरणम्—

धनात्मकैश्चाप्यधनात्मकैस्त्रिभि-
विभाजितं खं फलमाशु मे वद[३] ।
धनात्मकाश्चाप्यधनात्म(का)स्त्रयः
खभाजितास्त्वं गणक प्रवेत्सि चेत् ॥ ७ ॥

न्यासः—भाज्यः रू ०, भाजकः रू ३, रू ३̇ । भागे हृते जातमुभयोः फलं ० ।

न्यासः—भाज्यः रू ३, रू ३̇, भाजकः रू ० । भागे हृते जातः खहरः रू $\frac{3}{0}$ रू $\frac{\dot{3}}{0}$ ।[४]

अत्र खहरगुण उच्यते

शून्याभ्यासवशात्खतामुपगतो राशिः पुनः खोद्धृतो
व्यावृत्तिं पुनरेव तन्मयतया न प्राकृतिं गच्छति ।
आत्माभ्यासवशादनन्तममलं चिद्रूपमानन्ददं[५]
प्राप्य[६] ब्रह्मपदं न संसृतिपथं योगी गरीयानिव ॥ १४ ॥

प्राक्तनश्लोकश्च—

अस्मिन् विकारः खहरे न राशावपि प्रविष्टेष्वपि निःसृतेषु[७] ।
*बहुष्वपि स्याल्लयसृष्टिकालेऽनन्तेऽच्युते भूतगणेषु यद्वत् ॥[८] १५

इति खरूपभागहारः ।

खयोग-वियोग-गुणन-भजन-वर्ग-वर्गमूलेषु सूत्रम्—

खं खयुतं रहितं वा खं स्यात् खेनाहतं च विहृतं वा ।
खस्य कृतिः खं खपदं खमेव सर्वत्र विज्ञेयम् ॥ १५ ॥

---

१ °श्चित्यः। २ खहर°। ३ माश्रु वद। ४ न्यासः भाज्यः रू ३̇ भागे हृते जातः खहरः रू ३ वा रू २। ५ °दनन्यममलं विद्रूपमानंददं।
६ प्राथ। ७ निःसृते तु। *This line is missing from the manuscript.
८ भास्करीयबीजगणिते शून्यषड्विधौ अंतिमश्लोकः।

उदाहरणम्—

खें शून्येन युते च किं विरहिते किं खेन निघ्ने च किं
किं भक्ते किमु वर्गिते कथय भो मूलीकृते किं सखे !
राशिः कोऽपि खसङ्गुणो निजदलेनाढ्यः[१] खसंभाजितो
जाता द्वादश तं द्रुतं[२] वद दृढां प्रौढिं प्रयातोऽसि चेत् ॥८॥

न्यासः — रू ० । एतत् खेन युतं जातं ० । खेन रहितं जातं ० । खेन गुणितं ०, भक्तं ०, वर्गितं ०, मूलीकृतम् ० ।

न्यासः — ० । अज्ञातो राशिः कल्पितमिष्टं २ । अत्र 'शेषविधौ सति खगुणश्चिन्त्यः' तत्कथम् ? ० शून्येन द्विके गुणिते ०, अस्यार्द्धं ०, अनेन युतं ०, एतत् शून्येन हृतं शून्यमेव ० । दृश्याभावादियं क्रिया न निर्वहति । इष्टं २ । अत्र गुणनायागतं शून्यं पृथङ्न्यस्तम् । रू २, एतत्स्वार्धयुतं ३ । भागहरणायागतं[३] शून्यं हरस्थाने न्यस्तम् । शून्यं गुणकः शून्यं भागहारोऽतो गुणनभजने न कार्ये, तथाकृते जातोऽविकृतः ३ । यः कश्चिद् राशिः केनचिद् गुणितः पुनस्तेनैव भक्तश्चेदविकृत एव न भवति तर्हि गुणनभजने वृथा । अथ तथाकृते जातं ३ । अत्र त्रैराशिकं—यदि दृश्येनानेन ३ अयं राशिः २ तदा द्वादशभिः किमिति जातो राशिः ८ ।

इति शून्यस्य षड्विधम्[४] ।

(iii) अव्यक्तषड्विधम्

अथाव्यक्तसङ्कलनव्यवकलने करणसूत्रम्—

यावत्तावत्-कालक-नीलक-पीताश्च लोहितो हरितः ।
श्वेतक-चित्रक-कपिलक-पाटलकाः पाण्डु-धूम्र-शबलाश्च ॥ १७ ॥

श्यामलक-मेचक-धवलक-पिशङ्ग-शारङ्ग-बभ्रु-गौराद्याः ।
गणनोत्पत्त्यै विहिता संज्ञाश्चाव्यक्तमानानाम् ॥ १८ ॥

वर्गे च समजात्योर्योगः कार्यस्तथा वियोगश्च ।
असदृशजात्योर्योगे पृथक्स्थितिः स्याद् वियोगे च ॥ १९ ॥

क्षयधनयोर्युतिवियुती गुणनभजने वर्गवर्गमूले च ।
अव्यक्तानां बहूनां रूपवदुपलक्षणं भवति ॥ २० ॥

गणनेति योग-वियोग-गुणन-भजन-वर्ग-वर्गमूल-घन-घनमूल-त्रैराशिक-पंचराशिक-श्रेढि-क्षेत्र-खातादि यथोद्देशालापवत्त्वादेषां या गणना तस्या गणनाया[५] उत्पत्त्यै अवताराय वर्णाः

---

१ विजदलेनाद्यः । २ छतं । ३ °रणमागतं । ४ षड्विधे ।
५ °णनया ।

कल्पिताः । यावत्तावत्-कालक-नीलक-पीतक-लोहितक-हरितक-चित्रक-कपिलक-पाटलक-पाण्डुरक-धूम्रक-शबलक-श्यामलक-मेचक-धवलक-पिशङ्गक-सारङ्गक-बभ्रुक-गौरक इत्याद्या वर्णाः, अथवा वर्णाः कादयः, अथवा मधुरादयो[1] रसपर्यायाः, अथवा असदृशप्रथमाक्षरनाम-पदार्थाः कल्प्यन्ते । एषु समजात्योर्बहूनां वा योगवियोगौ कार्यौ । असदृशजात्योर्बहूनां वा वर्णानां पृथक् स्थितिः स्यात् । तेषां पर्यायानामप्युक्तानामृणधन—योगाद्युपलक्षणं[2] रूपवद् भवतीति ।

उदाहरणम्—

> अव्यक्तषट्कं च धनं सरूप-
> मव्यक्तयुग्मञ्च विपञ्चरूपम् ।
> किमेतयोरैक्यमृणं[3] धनञ्च
> तद्व्यस्तयोः सङ्कलन वदाशु[4] ॥९॥

न्यासः — या ६ रू १
या २ रू ५̇

समजात्योः स्वस्थाने योग इति जातं तथा न्यस्ते या ६ या २, रू १ रू ५̇ । ऋणधनयोः रूपवदुपलक्षणमिति[5] योगे जातं या ८ रू ४̇ ।

आद्यपक्षस्य ऋणत्वं प्रकल्प्य न्यासः —

या ६̇ रू १̇
या २ रू ५

योगे जातं या ४̇ रू ६̇ ।

द्वितीयपक्षस्य वैपरीत्यं कृत्वा न्यासः—

या ६ रू १
या २̇ रू ५
(योगे जातं) या ४ रू ६

उभयोर्व्यत्यासे न्यासः—या ६̇ रू १̇
या २̇ रू ५

योगे जातं या ८̇ रू ४ ।

---

१ मूधु° । २ ते पर्यायषामद्युक्तानां ऋणधनयोगाद्रूपल° ।
३ कि मेनयो° । ४ °दाश्रु । ५ °दुपलक्षणलक्षण° ।

उदाहरणम्—

अव्यक्तवर्गद्वितयं सरूप-
मव्यक्तयुग्मेन युतं च किं स्यात् ।
अव्यक्तषट्कं क्षयगं सरूपं
शोध्यं तु षड्रूपसुसंयुतेभ्यः[१] ॥
अव्यक्तकेभ्यो गणक ! प्रचक्ष्वा—
ष्टाभ्योऽवशेषं यदि वेत्सि[२] बीजम् । १० ।

प्रथमोदाहरणे न्यासः—

याव २ या ० रू १
याव ० या २ रू ०

योगे जातं याव २ या २ रू १ ।

द्वितीयोदाहरणे न्यासः —

या ८ रू ६
या ६̇ रू १

(वि)योगे जातं या १४ रू ५ ।

इत्यव्यक्तसंकलनव्यवकलने ।

अथाव्यक्तगुणने करणसूत्रम्—

स्याद्रूपवर्णघाते[३] वर्णो, द्वित्र्यादितुल्यजातिबधे ।
तत्कृतिघनादयः स्युः[४], तद्भावितमसमजातिवधे ॥ २१ ॥

गुणकारसमुत्थानि स्वजातिखण्डानि योजयेदेव[५] ।
अव्यक्तवर्गकरणीगुणनासु व्यक्तवज्ज्ञेयम्[६] ॥ २२ ॥

---

१ °पसयु° । २ वेसि ३ स्याद्रूप° । ४ स्यु । ५ °देवे ।
६ °वद्ज्ञे° ।

उदाहरणम्—

यावत्तावद्द्वितयसहितं रूपषट्कं विनिघ्नं
यावत्तावत्त्रितयरहितै[1] रूपकैः पञ्चभिश्च[2]।
गौणं किं स्याद् वद मम फलं हे सखे ! कल्पयित्वा
व्यक्ते[3] वर्णे पटुरसि यदि त्वं गुणाकारमार्गे ॥११॥

न्यासः—

गुण्यः या २ रू ६
गुणकः या ३ं रू ५

व्यक्तवद्गुणिते जातं याव ६ं या ८ं रू ३० ।

गुणकस्य धनर्णयोर्व्यत्यासे न्यासः—

या २ रू ६
या ३ रू ५ं

गुणिते जातं याव ६ या ८ रू ३०ं ।

गुण्यस्य व्यत्यासे न्यासः—

या २ं रू ६ं
या ३ं रू ५

गुणिते जातं याव ६ या ८ रू ३०ं ।[4]

गुण्यगुणकयोर्व्यत्यासे न्यासः—

या २ं रू ६ं
या ३ रू ५ं

गुणिते जातं याव ६ं या ८ं रू ३० ।

इत्यव्यक्तगुणना ।

---

१ °द्द्वित° । २ °श्वंच° । ३ व्यक्तं वर्णं । ४ याव ६ या ८ं रू ३०ं ।

अव्यक्तभागहारे सूत्रम्—

शुद्धयति यर्यैर्वर्णै रूपैर्भाजको[1] हतो भाज्यात् ।
क्रमशः स्वेषु स्वेषु स्थानेषु फलानि तानि स्युः ॥ २३ ॥

गुणनफलस्य (=भाज्यस्य) गुण्यभागहारस्य भागार्थं[2] न्यासः—

(i) याव ६̇ या ८̇ रू ३० (ii) याव ६ या ८ रू ३०̇
या २ रू ६ या २ रू ६

(iii) याव ६ या ८ रू ३०̇ (iv) याव ६̇ या ८̇ रू ३०
या २̇ रू ६̇ या २̇ रू ६̇

भागे हृते जातो गुणः या ३̇ रू ५, या ३ रू ५̇, या ३̇ रू ५, या ३ रू ५̇ ।

इत्यव्यक्तभागहारः।[3]

(अव्यक्तवर्गे उदाहरणम्—)

अव्यक्तानां रूपपञ्चोनितानां
षण्णां वर्गं वा युतानां प्रचक्ष्व ।
चेद् बीजज्ञोऽसि त्वमस्याः कृतेश्च
मूलं विद्वन् ! ब्रूहि तन्मे पृथक् किम्[4] ॥१२॥

न्यासः—

या ६ रू ५̇
या ६ रू ५

स्थाप्योन्त्यकृति[5]र्द्विसङ्गुणाऽन्त्यगुणेत्यादिना जातौ वर्गौ—

याव ३६ या ६०̇ रू २५
याव ३६ या ६० रू २५

(अव्यक्त वर्गमूले करण)सूत्रम्—

मूलान्यादायादौ वर्गेभ्यस्तद्द्वयोर्द्वयोर्घातम्[6] ।
द्विगुणं[7] जह्याच्छेषान् मूलमितीदं वदन्तीह ॥ २४ ॥

---

१ °र्यै यैर्वर्णैरूपै भा° । २ °गार्थं । ३ °गहरः । ४ पृथः किं ।
५ स्थाथात्य° । ६ द्वयोद्वयोधातं । ७ द्विगुण ।

पूर्ववर्गमूलार्थं[1] न्यासः—

याव ३६ या ६̇० रू २५
याव ३६ या ६० रू २५

एतयोर्मूले या ६̇ रू ५ । या ६ रू ५ ।

इत्यव्यक्तवर्गमूले ।

इत्यव्यक्तषड्विधम् ।

(iv) वर्णषड्विधम्

उदाहरणम्—

यावत्तावत्त्रितयमधनं कालकाः षट् क्षयं भोः
विद्वन् ! नीलाष्टकमपि धनं पीतकाः स्वं च पञ्च ।
रूपाढ्यैस्तैर्द्विगुणितमितैस्तेऽपि युक्ता वियुक्ताः
जानासि त्वं यदि झटिति मे ब्रूहि वर्णाः कति स्युः ॥१३॥

तैस्तैर्हता[2] कथय किं गुणने फलं स्याद्
भक्तं[3] च तद् गणकवर्य[4] गुणेन तेन ।
गुण्यस्य मे कथय वर्गमतश्च मूलं
चेद् वर्णषड्विधविधाववधिं गतोऽसि ॥१४॥

न्यासः—

या ३̇ का ६̇ नी ८ पी ५ रू १
या ६̇ का १२̇ नी १६ पी १० रू २

योगे जातं—या ६̇ का १८̇ नी २४ पी १५ रू ३ । वियोगे जातं—या ३̇ का ६̇ नी ८ पी ५ रू १ ।

इति वर्णसङ्कलनव्यवकलने ।

(गुणने) न्यासः—

गुण्यः या ३̇ का ६̇ नी ८ पी ५ रू १
गुणकः या ६̇ का १२̇ नी १६ पी १० रू २

---

[1] पूर्ववर्गभूलार्थं । [2] तैस्तै हृता । [3] भुक्तं । [4] गुणकवर्ग ।

गुणिते जातं—याव १८ याका ७२ यानी ९६̇ यापी ६०̇ या १२̇ काव ७२ कानी १९२̇ कापी १२०̇ का २४ नीव १२८ नीपी १६० नी ३२ पीव ५० पी २० रू २।[१] एत एव यथाक्रमेण न्यस्ता जाताः याव १८ काव ७२ नीव १२८ पीव ५० याका ७२ यानी ९६̇ यापी ६०̇ कानी १९२̇ कापी १२०̇ नीपी १६० या १२̇ का २४̇ नी ३२ पी २० रू २।

(गुण्येन) भक्ते जातो गुणकः या ६̇ का १२̇ नी १६ पी १० रू २।

इति वर्णगुणनभजने।

वर्गार्थं न्यासः— या ३̇ का ६̇ नी ८ पी ५ रू १।

उक्तवज्जातो वर्गः—याव ९ याका ३६ यानी ४८̇ यापी ३०̇ या ६̇ काव ३६ कानी ९६̇ कापी ६०̇ का १२̇ नीव ६४ नीपी ८० नी १६ पीव २५ पी १० रू १। यथाक्रमं न्यासः—याव ९ काव ३६ नीव ६४ पीव २५ याका ३६ यानी ४८̇ यापी ३०̇ कानी ९६̇ कापी ६०̇ नीपी ८० या ६̇ का १२̇ नी १६ पी १० रू १।

अस्माद् वर्गाज्जातं[२] मूलं—या ३̇ का ६̇ नी ८ पी ५ रू १।

इति वर्णवर्ग-वर्गमूले।

इति वर्णषड्विधम्।

(v) करणीषड्विधम्।

अथ करणीषड्विधम्—

> मूलं ग्राह्यं राशेर्यस्य तु[३] करणीति नाम तस्य स्यात्।
> सङ्गुणनं भजनं वा कुर्याद् वर्गस्य वर्गेण॥ २५॥
>
> लघ्व्या वापि महत्या पृथक् करण्यौ हृते च तत्पदयोः[४]।
> युतिवियुति[५]कृती च तया गुणिते योगान्तरे भवतः॥ २६॥

---

१ याव १८ याकाभा १२ यानी ९६ पापी ६०̇ या १२̇ काव ७२ कानी १९२ कापी १२०̇ का २४̇ नीव १२८ नीपी १६० नी ३२ पीव ५० या २० रू २।
२ वर्गाज्जातं। ३ मूले ग्राह्ये राशेर्यस्य नु। ४ चेत्पदयोः। ५ युतिविद्युती।

गुणिते वापि करण्यावनल्पया वाऽल्पया च तत्पदयोः ।
युतिवियुतिकृती भक्ते[१] ह्यभीष्टया योगविवरे स्तः[२] ॥ २७ ॥

अथवा लघ्व्या महतीं भक्त्वैतन्मूलमेकयुक्तोनम्[३] ।
स्वघ्नं लघ्व्या गुणितं युतिवियुती स्तो महत्यैवम्[४] ॥ २८ ॥

रूपवदपि च करण्योर्घातपदेन द्विसङ्गुणेन[५] युतिः ।
युक्तोना[६] युतिवियुती पृथक्स्थितिः[७] स्यान्न घातपदम्[८] ॥ २९ ॥

करणीनां[९] तु बहूनां योगे केनापि राशिना छित्वा ।
तन्मूलयुतिः स्वघ्ना छेदगुणा[१०] स्याद्युतिस्तासाम् ॥ ३० ॥

उदाहरणम्—

षट्सिद्धसङ्ख्ययोर्योगविशेषौ[११] वद मे द्रुतम् ।
करण्योर्द्वित्रिमित्योश्च योगशेषे तयोर्वद ॥ १५ ॥

न्यासः— क ६ क २४ । अत्र लघ्व्या ६ भक्ते १ । ४ अथवा महत्या भक्ते $\frac{१}{४}$ । १ । मूले १ । २ वा $\frac{१}{२}$ । १ । युतिवियुती ३ । १ वा $\frac{३}{२}$ । $\frac{१}{२}$ । कृती ९ । १ वा $\frac{९}{४}$ । $\frac{१}{४}$ । लघ्व्या गुणिते ५४ । ६ महत्या वा ५४ । ६ । जाते योगान्तरे[१२] क ५४ क ६ ।

द्वितीयप्रकारेण—

क ६ क २४ । एते[१३] महत्या २४ गुणिते १४४ । ५७६ लघ्व्या वा ३६ । १४४ । अनयोर्मूले[१४] १२ । २४ वा ६ । १२ । युतिवियुती ३६ । १२ वा १८ । ६ । कृती १२९६ । १४४ वा ३२४ । ३६ । महत्या भक्ते लघ्व्या[१५] वा भक्ते जाते योगान्तरे क ५४ क ६ ।

अथवा तृतीयप्रकारः—

क ६ क २४ । लघ्व्या ६ महती महत्या वा लघ्वी भक्ता ४ वा $\frac{१}{४}$ । मूलं २ वा $\frac{१}{२}$ । एकयुतमूनं च ३ । १ वा । $\frac{३}{२}$ । $\frac{१}{२}$ । स्वघ्नं ९ । १ वा $\frac{९}{४}$ । $\frac{१}{४}$ । लघ्व्या ६ महत्या २४ वा गुणिते[१६] जाते योगान्तरे क ५४ क ६ ।

---

[१] भक्तै । [२] योगविवरस्त । [३] भक्तेकं तन्मूलयुक्तो° । [४] महत्येव ।
[५] °न हिस° । [६] युक्तो वा । [७] पृथवित्स्थितिः । [८] घातप° ।
[९] °णानां । [१०] च्छेद° । [११] °संख्योर्यो° । [१२] °तेर्यो° ।
[१३] क ६ क २४९ ते । [१४] मुले । [१५] लघ्या । [१६] भक्ते ।

अथ चतुर्थप्रकारः—

क ६ क २४ । एते रूपाणि प्रकल्प्य रू ६ रू २४ । घातपदेन १२ द्विगुणेन[1] २४ करण्योर्युतिः ३० युतोना जाते योगान्तरे करण्यौ क ५४ क ६ ।

द्वितीयोदाहरणे करण्यौ क २ क ३ । अनयोर्घाते मूलाभावात् पृथक् स्थितिरिति योगे जातं क २ क ३ । अन्तरे च क २̇ क ३ ।

इति करणीसङ्कलनव्यवकलने ।

करणीगुणनादौ सूत्रम्—

करणीनां (च) बहूनां यासां संयोगसम्भवोऽप्यस्ति ।
तासां योगं कृत्वा कार्यं गुणनादि वा कर्म ॥ ३१ ॥

क्षयरूपकृतिः क्षयगा भवेद्यदा सा[2] प्रयाति करणीत्वम् ।
क्षयगतकरणीमूलं रूपत्वं क्षयगतं भवति ॥ ३२ ॥

उदाहरणम्—

षड्रूपाढ्या गणक ! करणीपञ्चसङ्ख्या च गुण्यो
द्वेऽष्टौ पञ्च-प्रमितकरणीखण्डसङ्ख्या गुणश्च ।
षड्रूपोने शरनखमिते वा गुणे किं फलं स्यात्
तद्गुण्याप्तां वद गुणमिति प्रौढता चेत्तवास्ति ॥ १६ ॥

प्रथमन्यासः[3]—

गुण्यः क ३६ क ५ ।

गुणकः क ८ क ५ क २ ।[4]

गुणिते जातं क २८८ क १८० क ७२ क ४० क २५ क १० । एतास्वनयोः क २८८ क ७२ योगे जातं क ६४८ । पुनरनयोः क ४० क १० योगे जातं क ९० । पुनरस्याः क २५ मूलं रू ५ । यथाक्रमं न्यासः—रू ५ क ६४८ क १८० क ९० ।

---

[1] घातपदे १२ तद्वि° । [2] भवेघतस्क । [3] प्रथमं न्यासः । [4] गुणकः क ८ क ५ क ५ ।

अथवा लघुकर्मणा—गुण्यः क ३६ क ५ ।

गुणकः क ८ क ५ क २ ।

द्विकाष्टमित्योर्योगे कृते जातो गुणकः क १८ क ५ ।

गुणिते जातं तदेव रू ५ क ६४८ क १८० क ९० ।

द्वितीयोदाहरणे—

गुण्यः क ३६ क ५ ।

गुणकः क ३६ क २० क ५ ।

गुणिते जातं क १२९६[१] क ७२० क १८० क १८० क १०० क २५ । एतास्वासां[२] क १२९६ क १०० क २५ मूलानि रू ३६ रू १० रू[३] ५ । योगः रू २१ । पुनरनयोः क १८० क १८० योगः ० । इमामस्यां क ७२० संयोज्य जातं क ७२० । यथाक्रमं न्यासः— रू २१ क ७२० । वा लघुकर्मणि वा

गुण्यः क ३६ क ५ ।

गुणकः क ३६ क २० क ५ ।

नखशरमितयोर्योगे कृते जातो गुणकः क ४५ क ३६ ।

गुणिते जातं तदेव रू २१ क ७२० ।

अपि च—

रूपद्वयाढ्यकरणीद्वितयेन निघ्ना[४]
दन्तस्मृतीभयुगलप्रमिताः[५] करण्यः ।
किं स्यात्फलं कथय तत् त्वरितं[६] करण्या[७]
निघ्ना भुजङ्गयमलोन्मितयाऽथवा ताः ॥ १७ ॥

प्रथम[८]न्यासः—

गुण्यः क ३२ क १८ क ८ क २ ।

गुणकः क ४ क २ ।

---

[१] क भ ९६ । [२] क २५९ ता° । [३] क । [४] विघ्ना ।
[५] दंतस्मृतीनयुगुल° । [६] यत्त्वरितं । [७] करिष्या । [८] प्रथमं ।

गुणिते जातं क १२८ क ७२ क ६४ क ३६ क ३२ क १६ क ८ क ४। एताष्वासां क ६४ क ३६ क १६ क ४ मूलानि रू ८ रू ६ रू ४ रू २ योगे रू २०। पुनरेताः (क १२८ क ७२ क ३२ क ८) द्विकेन छिन्नाः क ६४ क ३६ क १६ क ४, आसां मूलयुतिः २० स्वघ्ना ४०० पूर्वच्छेदेन २ गुणिता जातः[1] अवर्गकरणीनां योगः क ८००। यथाक्रमं न्यासः रू २० क ८००।

अथवा गुण्यकरणीनां योगः क २००। गुणकः क ४ क २। गुणितं जातं तदेव रू २० क ८००।

द्वितीयोदाहरणे

गुण्यः क ३२ क १८ क ८ क २।

(गुणकः क ८ क २।)

गुणिते योगे च कृते जातं रू ६०।

इति करणीगुणनम्।

करणीभागहारे सूत्रम्—

छेदकरण्यो निखिलाः कत्यपि वा वर्गसिद्धये हन्यात्।
तासां मूलसमासो रूपसमानो यथा भवति॥ ३३॥

लब्धकरण्यो गुणकस्तद्गुणहारं त्यजेद् भाज्यात्।
शुद्धिर्न भवेद्यदि वा तद्गुणकच्छेदकरणीनाम्॥ ३४॥

योगसपि भाज्यराशेर्जह्यात्सदृशखण्डे च।
रूपाभावे हारो येन निघ्नः[2] शुध्यति तत्फलं स्यात्॥ ३५॥

पूर्वगुणफलस्य स्वगुणच्छेदस्य[3] भागार्थं न्यासः—

(i) रू ५ क ६४८ क १८० क ९० । छेदः क ३६ क ५।

(ii) रू २१ क ७२०। छेदः क ३६ क ५।

(iii) रू २० क ८००। छेदः क ४ क २।

(iv) (रू ६०। छेदः क १८)

---

[1] जाते। [2] येनघ्नः। [3] °णछेद°।

प्रथमोदाहरणे "छेदकरण्यो निखिलाः कत्यपि वा वर्गसिद्धये हन्यादि"ति छेदकरणी क ३६ क ५, एतयोरियं (क) ५ वर्गसिद्धये करणीपञ्चगुणिता (क) २५, अस्या मूलं ५ रूपसमं, रू ५ एतत्समं करण्योर्गुणः। क ५ एतद्गुणं हरं रू ५ क १८० भाज्याद् विशोध्य शेषं क ६४८ क ९० । "रूपाभावे हारो येन घ्नः शुध्यति तत्फलं स्यादि"ति अष्टादश करण्या गुणं हरं भाज्याद्विशोध्य (निःशेषं जातं) लब्धं क १८ इति लब्धो गुणः क ५ क १८।

द्वितीयोदाहरणे[१] षट्त्रिंशत्करणीमृणषट्त्रिंशत्करण्या क ३६ पञ्चकरणीं पञ्च-चत्वारिंशत्करण्या (क) ४५ सङ्गुण्य जातं क १२९६ क २२५ मूलैक्यं रूपसमं, करण्यौ क ३६ क ४५ एतद्गुणं हरं भाज्याद् विशोध्य लब्धं करणी क ३६ क ४५।

तृतीयोदाहरणे रू २० क ८०० छेदः क ४ क २। अत्र द्विकरणीं द्विशतकरण्या क २०० सङ्गुण्य जातं क ४०० मूलं रू २०। द्विशत्या करण्या गुणं हरं भाज्याच्छोध्य लब्धं करणी क २००।

चतुर्थोदाहरणे रू ६० छेदः क १८। अत्र द्विशतकरण्या[२] गुणितं हरं भाज्याद्विशोध्य लब्धं करणी[३] क २००।

यथाक्रमं लब्धकरण्यः क १८ क ५। क ३६ क ४५। क २००। क २००।

करणीविश्लेषणे सूत्रम्—

> योगजकरणीं कृत्या कयाऽपि शुद्धिर्यथा भवेद्[४] विभजेत्।
> तत्खण्डानि स्वगुणानि[५] लब्ध्या हृतानि च करण्यः ॥ ३६ ॥

पूर्वं खण्डत्रयमासीदिति प्रथमलब्धकरणी क १८ क ५। अत्र योगजकरणी १८ त्रिवर्गेण ९ हृता लब्धं क २। त्रयाणां (खण्डे) रू २ रू १ स्वघ्ने क ४ क १ लब्ध क २ गुणिते जाते करणीखण्डे क ८ क २। एवं लब्धं क ८ क ५ क २।

द्वितीयोदाहरणे लब्धं क ३६ क २० क ५।

तृतीयस्य खण्डचतुष्टयमासीदिति इयं क २००। दशवर्गाच्छताल्लब्धं क २। दशानां खण्डानि रू ४ रू ३ रू २ रू १ एतानि स्वगुणानि क १६ क ९ क ४ क १ लब्ध क २ हृतानि क ३२ क १८ क ८ क २ जाता लब्धकरण्यः।

चतुर्थोदाहरणेप्येता एव क ३२ क १८ क ८ क २।

---

१ क २५ क १८ द्वितीयो°। २ द्विशति°। ३ करणी करणी। ४ भजेत्।
५ स्वगुणितानि।

अपि च—

बाणाग्नयः खदहनाः शशिलोचनानि[१]
वस्विन्दवोऽब्धिशशिनो यमलैन्दवश्च ।
खण्डानि तानि करणीशरताडितानि
द्वित्रीषुखण्डविहृतानि सखे फलं किम् ॥ १८ ॥

न्यासः—

भाज्यः क १७५ क १५० क १०५ क ९० क ७० क ६० ।

भाजकः क ५ क ३ क २ ।

"रूपाभावे हारो येन निघ्नः (शुध्यति तत्) फलं स्यात्" इति प्राग्वद् भागे[२] हृते जातं क ३५ क ३० ।

अथवाऽन्यथोच्यते—

छेदेऽभीष्टकरण्या [३]ऋणधनताव्यत्ययोऽसकृत्कार्यः ।
भाज्यहरौ[४] सङ्गुणयेद्यावच्छेदे करण्येका ॥ ३७ ॥
विभजेत्तया करण्या भाज्योद्भूताः करण्यश्च ।
लब्धा योगजकरणी चेत् स्याद्विश्लेषणं प्राग्वत् ॥ ३८ ॥

प्रथमोदाहरणे भागार्थं न्यासः—

(भाज्यः) क २५ क ६४८ क १८० क ९० ।

छेदः क ३६ क ५ ।

"छेदे[५]ऽभीष्टकरण्या ऋणधनताव्यत्ययोऽसकृत्कार्यं" इति छेदकरण्योः पञ्चमितायाः ऋणत्वं प्रकल्प्य क ३६ क ५ अनया हृते भाज्ये योगे च कृते जातं (क) १७२९८ क ४८०५ छेदके च क ९६१ । अनया हृते भाज्ये लब्धो गुणकः क १८ क ५ । प्राग्वद् विश्लेषणे जातं क ८ क ५ क २ ।

---

१ °य खदहना राशि° । २ भावे । ३ क्षयधनता° । ४ भाज्यहारौ ।
५ छिदे ।

द्वितीयोदाहरणे न्यासः—

रू २१ क ७२० । छेदः क ३६ क ५ ।

अत्र छेदे पञ्चमितकरण्या ऋणत्वं प्रकल्प्य भाज्ये गुणिते योगे च कृते जातं रू १८६ क ४३२४५ छेदे च क ९६१ । अनेन[1] भाज्ये हृते विश्लेषसूत्रेण पृथक्कृते च जातं क ३६ क २० क ५ ।

तृतीयोदाहरणे न्यासः—

क ४०० क ८०० । छेदः क ४ क २ ।

अत्र चतुःकरण्या ऋणत्वं प्रकल्प्य (भाज्ये गुणिते योगे च कृते जातं क ८०० । छेदे च क ४ । अनेन भाज्ये हृते) विश्लेषणे (च) जातं क ३२ क १८ क ८ क २ ।

चतुर्थे न्यासः—

क ३६०० । छेदः[2] क १८ ।

"यावच्छेदे करण्यैके" ति स्वयमेवैका[3] तया[4] भाज्ये हृते लब्धं क २०० विश्लेषिते जातं क ३२ क १८ क ८ क २ ।

अनन्तरोक्तोदाहरणस्य न्यासः—

क १७५ क १५० क १०५ क ९० क ७० क ६० ।

छेदकः क ५ क ३ क २ ।

अत्र छेदकरणीषु द्विकरण्या ऋणत्वं प्रकल्प्य जातं क ५ क ३ क २ । अनया भाज्ये गुणिते योगे च कृते जातं क २१०० क १८०० क १२६० क १०८० । छेदके च क ३६ क ६० । अत्र षट्त्रिंशत्करण्या ऋणत्वं प्रकल्प्य जातं क ३६ क ६० । अनया भाज्ये (क २१०० क १८०० क १२६० क १०८०) गुणिते योगे च कृते जातं क २०१६० क १७२८० छेदे च जातं क ५७६ । अनया भाज्येऽस्मिन् क २०१६० क १७२८० हृते लब्धं क ३५ क ३० ।

करणीखण्डेषु ययोर्ययोर्योगसम्भवोऽप्यस्ति तयो(र्तयो)र्योगं कृत्वा गुणन-भजन-वर्ग-वर्गमूलानि कार्याणि ।

इति करणीभागहारः ।

---

[1] अन्येन । [2] छे । [3] °वैक । [4] तया हृते ।

अथ करणीवर्गे सूत्रम्—

धनगतकरणीनां वा क्षयगानां तत्समानरूपाणि ।
स्युर्धनगतानि वर्गे शेषाः स्वमृणोपलक्ष्यास्ताः ॥ ३९ ॥

अन्तरकरणीवर्गे सम्प्राप्तेऽपि च तयोर्धनक्षययोः ।
व्यस्तं स्वर्णं सुधिया कार्यं वर्गस्तयोस्तुल्यः ॥ ४० ॥

उदाहरणम्—

वर्गं करण्योर्द्विकराममित्यो-
स्त्रिषड्द्विकानां[1] च पृथग्वदाशु[2] ॥
सप्तद्विपञ्चत्रिकसम्मिताना-
मङ्गेषुरामाक्षिमहीमितानाम् ।
दन्तस्मृतीभद्विकसम्मितानां[3]
चेद् वेत्सि विद्वन् करणीविधानम् ॥ १९ ॥

न्यासः—अलघुपूर्वकं न्यस्ताः क ३ क २ । क ६ क ३ क २ । क ७ क ५ क ३ क २ । क ६ क ५ क ३ क २ क १ । क ३२ क १८ क ८ क २ । जाता यथाक्रमं वर्गाः रू ५ क २४ । रू ११ क ७२ क ४८ क २४ । रू १७ क १४० क ८४ क ५६ क ६० क ४० क २४ । रू १७ क १२० क ७२ क ४८ क २४ क ६० क ४० क २० क २४ क १२ क ८ । पञ्चमोदाहरणे क ३२ क १८ क ८ क २ योगे जातं क २०० अस्य वर्गः रू २०० ।

उदाहरणम्—

पञ्चत्रिमितकरण्योरन्तरवर्गं वदाशु[4] मे विद्वन् ।
पङ्चत्रिद्विमितानां स्वस्वर्णानामृणर्णधनगानाम्[5] ॥ २० ॥

न्यासः— क ५ क ३ । एतयोरन्तरं क ५ क ३̇ वा क ५̇ क ३ । अनयोर्वर्गस्तुल्य एव रू ८ क ६०̇[6] ।

द्वितीयस्य न्यासः— क ५ क ३ क २̇ वा क ५̇ क ३̇ क २ । अनयोर्वर्गस्तुल्य एव रू १० क ६० क ४०̇ क २४̇ ।

इति करणीवर्गः[7] ।

---

१ °षट्विका° । २ °वदाश्रु । ३ दत° । ४ °वर्गं वदाश्रु ।
५ °मृणार्ण° । ६ रू ८ रू ६० । ७ °वर्गाः ।

करणीवर्गमूले[१] सूत्रम्—

करणीवर्गे नियमः सङ्कलितमितानि (खण्डकानि) स्युः।
एककरण्या वर्गे रूपाण्येव द्वयोः सरूपा च ॥ ४१ ॥

तिसृणां तिस्रश्च तथा षडपि चतुर्णां दशापि[२] पञ्चानाम्।
षण्णामपि पञ्चदशेत्येवं ज्ञेयानि खण्डानि ॥ ४२ ॥

सङ्कलितात्मकमूले[३] तन्मितखण्डैक्यतुल्यरूपाणि।
रूपकृतेः प्रोज्झ्य[४] पदं तेनोनयुतानि रूपाणि ॥ ४३ ॥

दलिते करणीखण्डे सन्ति करण्यः कृतौ[५] शेषाः।
महती रूपाणि तयोः प्राग्वत्साध्येऽपरे खण्डे ॥ ४४ ॥

सङ्कलितात्मकमूलाभावे खण्डेषु तेषु खण्डानि।
विश्लेष्य यथा मूलप्राप्तिः स्यादन्यथैवासत् ॥ ४५ ॥

अथ प्रकारान्तरमाह—

अथवा सर्वकरण्यश्चतुर्विभक्ता न्यसेदनल्पायाः।
आद्यासन्नकरण्योर्हतिराद्याप्ता च तत्पदं करणी ॥ ४६ ॥

ते एव तया भक्ते करणीखण्डे परे भवतः।
क्रमशस्तैरपि खण्डैः शेषाः भक्ताः परा करणी ॥ ४७ ॥

तैरपि मुहुः सलब्धैः शेषाः करणीर्भजेत् प्राग्वत्।
पदकरणीवर्गयुतिं विशोधयेद् रूपवर्गेभ्यः[६] ॥ ४८ ॥

एवं कृते तु न यदा तदा भवेद्योगजा करणी।
विश्लेषसमुत्पाद्याः करणीवर्गे करण्योऽन्याः[७] ॥ ४९ ॥

पूर्वसिद्धवर्गाणां[८] प्रथमो वर्गः रू ५ क २४। अत्रैकमेव करणीखण्डम्। अत्र परिभाषितम्—

करणीखण्डमितिर्या[९] द्विगुणा रूपांघ्रियुक्तया[१०] मूलम्।
[११]रूपदलेन विहीनं सङ्कलितपदं भवत्येव[१२] ॥ ५० ॥

---

१ °वर्ग°। २ षडपि च चतुर्णां दशपि च। ३ °मूल। ४ प्रोह्य। ५ कृता। ६ भाज्यरूपेभ्यः। ७ करण्योन्या। ८ पूर्वसिद्धिव°। ९ °मितिर्वा। १० °क्तता। ११ रूपक°। १२ °वत्यैव।

करणीखण्डं (१) द्विगुणं २ रूपाङ्घ्रि $\frac{१}{४}$ युक्तं $\frac{९}{४}$ मूलं $\frac{३}{२}$ रूपार्धेन $\frac{१}{२}$ विहीनं १ एतदेव सङ्कलितपदम्। एतन्मिता करणी क २४ रूपकृतेः[१] २५ अपास्य शेषमूलं १ अनेनोन-युतानि रूपाणि ४। ६ दलिते करणीखण्डे[२] क २ क ३। एत एव मूलकरण्यौ क ३ क २।

द्वितीयवर्गस्य (न्यासः)—रू ११ क ७२ क ४८ क २४। अत्र करणीखण्डमितिः ३ द्विगुणा[३] ६ रूपाङ्घ्रि $\frac{१}{४}$ युता $\frac{२५}{४}$ मूलं $\frac{५}{२}$ रूपदलेन $\frac{१}{२}$ विहीनं सङ्कलितपदम् २। एतन्मिते द्वे करणीखण्डे अष्टचत्वारिंशत्[४] चतुर्विंशतिकरणी ४८। २४ तुल्यानि रूपाणि ७२ रूपकृतेः १२१ अपास्य शेषं ४९ मूलं ७ अनेन रूपाणि ११ ऊनयुतानि ४। १८ दलिते जाते करणीखण्डे क २ क ९। अत्र महती रूपाणि प्रकल्प्य न्यासः— रू ९ क ७२। द्विसप्ततितुल्यानि रूपाणि रूपकृतेः ८१ प्रोज्झ्य पदं ३ ऊनयुतरूपाणाम् ६। १२ अर्धे[५] ३। ६ यथाक्रमं न्यासः—क ६ क ३ क २।

अथवा— द्विसप्तति-चतुर्विंशतिमितकरणीतुल्य क ७२ क २४ रूपाणि ९६ रूपकृतेः १२१ प्रोज्झ्य २५ पदं ५ ऊनयुतरूपाणां ६। १६ अर्द्धे[६] जाते मूलकरण्यौ क ३ क ८। अत्र महती रूपाणि प्रकल्प्य रू ८ क ४८ रूपकृतेः ६४ अष्टचत्वारिंशत् करण्या[७]स्तुल्य रूपाण्यपास्य १६ मूलं ४ ऊनयुत ४। १२ रूपाणामर्धे जाते मूलकरण्यौ क २ क ६। यथाक्रमं न्यासः—क ६ क ३ क २।

अथवा—द्विसप्तत्यष्टचत्वारिंशत्करण्यास्तुल्यानि रूपाणि १२० (रूपकृतेः १२१) अपास्य १ मूलं १ ऊनयुतरूपाणा १०। १२ मर्धे जाते मूलकरण्यौ क ५ क ६। अत्र महतीत्युपलक्षणं[८] क्वचिदल्पाऽपि रूपाणि प्रकल्प्य न्यासः— रू ५ क २४। प्राग्वज्जाते मूलकरण्यौ क २ क ३। यथाक्रमं न्यासः—क ६ क ३ क २।

तृतीयवर्गस्य न्यासः—रू १७ क १४० क ८४ क ६० क ५६ क ४० क २४। अत्र वर्गे षट्पञ्चाशत्-चत्वारिंशत्-चतुर्विंशतिकरणीतुल्यानि क ५६ क ४० क २४ रूपाणि रूपकृते २८९ रपास्य[९] शेषं १६९ मूलं १३ ऊनाधिकरूपाणा ४। ३० मर्धे २। १५ जाते मूलकरण्यौ क २ क १५। अत्र महती रूपाणि (प्रकल्प्य) रू १५ क १४० क ८४ क ६०। अत्र रूपकृतेः २२५ चतुरशीतिषष्टि[१०]करण्यास्तुल्यानि रूपाण्यपास्य शेषमूलं ९, ऊनयुतरूपाणामर्धे जाते मूलकरण्यौ क ३ क १२। महती रूपाणि (प्रकल्प्य) रू १२ क १४०। शेषकरण्यास्तुल्यानि (रूपाणि) रूपकृतेरपास्य शेषं ४ मूलं २ ऊनयुतरूपाणामर्धे जाते मूलकरण्यो क ५ क ७। मूलकरणीनां यथाक्रमं न्यासः— क ७ क ५ क ३ क २।

---

१ °कृते। २ खण्डे ४२ क ३। ३ द्विगुणः। ४ °शति। ५ अद्धे। ६ अद्धे। ७ अष्टाविंशतिक°। ८ °क्षणः। ९ °ते १८९ र°। १० °षष्ठि।

चतुर्थवर्गस्य न्यासः— रू १७ क १२८ क १२० क १०८ क ९६ क ६० क ४० क २० । अत्र करणीखण्डानि सप्त वर्तन्ते ७ द्विगुणानि १४ रूपचतुर्थांशयुतं[1] ५७/४ (अवर्गत्वात्) अस्य सङ्कलितपदाभावः । अतः स्वबुद्धचा इयं क १२८ चतुर्वर्गेण[2] भक्ता लब्धं ८ चतुर्णां समे खण्डे ३ । १ स्वघ्ने ९ । १ पूर्वलब्ध्या ८ गुणिते करण्यौ क ७२ क ८ । खण्डाष्टके सङ्कलितपदाभावः । अतः करणीयं क ९६ द्विवर्गेण ४ भक्ता लब्धं २४ द्विकस्य समे खण्डे १ । १ पूर्वलब्ध्या २४ गुणिते करणीखण्डे क २४ क २४ । खण्डनवकेऽपि सङ्कलितपदाभावः । अतः करणीयं क १०८ षड्वर्गेण भक्ता लब्धं ३ षण्णां समे खण्डे ४ । २ अनयोर्वर्गौ १६ । ४ पूर्वलब्ध्या गुणितौ जाते करणीखण्डे क ४८ क १२ । यथाक्रमं न्यस्ते जातं रू १७ क १२० क ७२ क ६० क ४८ क ४० क २४ क २४ क २० क १२ क ८ । अत्र करणीखण्डदशकं वर्तते । दशानां संकलितपदम् ४ । इयं खण्डसङ्ख्या । खण्डचतुष्टयस्यास्य क २४ क २० क १२ क ८ करण्यास्तुल्यानि रूपाणि रूपकृतेः[3] २८९ अपास्य मूलं १५ ऊनयुतरूपाणामर्धे करण्यौ क १ क १६ । महती रूपाणि रू १६ । क १२० क ७२ क ६० क ४८ क ४० क २४ षण्णां करणीनां सङ्कलितपद ३ मितखण्डत्रयस्यास्य क ४८ क ४० क २४ तुल्यानि रूपाणि रूपकृतेरपास्य शेष १४४ मूलं १२ ऊनयुतरूपार्धे[4] करणीखण्डे क २ क १४ । पूर्ववन्महती रूपाणि प्रकल्प्य रू १४ क १२० क ७२ क ६० करणीत्रये करणीद्वयस्यास्य क ७२ क ६० करण्यास्तुल्यानि रूपाणि रूपकृतेरपास्य मूलं ८, ऊनयुतरूपाणामर्धे करणीखण्डे क ३ क ११ । पुनर्महती रूपाणि रू ११ क १२० करणीतुल्यानि रूपाणि रूपकृतेरपास्य मूलं १ ऊनयुतरूपाणामर्धे जाते करणीखण्डे क ५ क ६ । मूलकरणीनां यथाक्रमं न्यासः— क ६ क ५ क ३ क २ क १ ।

पञ्चमवर्गस्य न्यासः—रू ६० क २३०४ क० १०२४ क ५७६ क २५६ क १४४ क ६४ । अत्र करणीषट्के करणीत्रयस्यास्य क २५६ क १४४ क ६४ करण्यास्तुल्यानि रूपाणि रूपकृते ३६०० रपास्य शेषमूलं ५६ ऊनयुतरूपाणामर्धे करण्यौ क २ क ५८ । महती रूपाणि प्रकल्प्य रू ५८ क २३०४ क १०२४ क ५७६ करणीत्रये करणीद्वयस्यास्य क १०२४ क ५७६ करण्यास्तुल्यानि रूपाणि रूपकृते ३३६४ रपास्य मूलं ४२ ऊनयुतरूपाणामर्द्धे मूलकरण्यौ क ८ क ५० । पुनर्महती रूपाणि प्रकल्प्य रू ५० क २३०४ करण्यास्तुल्यानि रूपाणि रूपकृतेरपास्य मूलं १४ ऊनयुतरूपाणामर्द्धे मूलकरण्यौ क १८ क ३२ । करणीनां यथाक्रमं न्यासः क ३२ क १८ क ८ क २ ।

अथवा—वर्गराशे रूपं हित्वा सर्वकरणीभ्यो[5] मूलानि रू ६० रू ४८ रू ३२ रू २४ रू १६ रू १२ रू ८ एषामैक्यं वर्गराशिः रू २०० । "मूलं ग्राह्यं राशेर्यस्य तु करणीति नाम तस्य स्यादि" ति करणीत्वात् (मूलं क २०० विश्लेषणे क ३२ क १८ क ८ क २) ।

---

१ °र्थांस° । २ चतुर्थ° । ३ कृते २८९ । ४ °युतंरूपार्द्धे ।
५ सर्वकरणीभ्यां ।

अथ द्वितीयप्रकारेण मूलानयनम् । प्रथमवर्गस्य न्यासः—रू ५ क २४ । अत्रैककरणीखण्डत्वाच्चतुर्भक्ता रू ५ क ६ आद्यासन्नद्वयहृतिरित्याद्यासन्नकरणीखण्डे न स्तः, करण्योर्वाते षट् ६ रूपाणि प्रकल्प्य रू ६, योगे पञ्च[1], "योगकृतेश्चतुराहृतघातोनायाः पदं विवरमि"त्यन्तरं रू १, "योगे द्विष्ठेऽन्तरयुतहीने[2] तार्धितौ च राशी स्त" इति सङ्क्रमणेन जाते खण्डे ३ । २ । एत एव मूलकरण्यौ क ३ क २ इति सङ्क्रमणेन सिध्यति ।

द्वितीयवर्गस्य न्यासः—रू ११ क ७२ क ४८ क २४ । चतुर्भक्ताः करण्यः[3] रू ११ क १८ क १२ क ६ । अत्राद्यासन्ने क १२ क ६, हृतिः ७२, आद्यया भक्ते ४, मूलं करणी क[4] २ । अनया त एव करण्यौ क १२ क ६ भक्ते जाते त एव मूलकरण्यौ क ६ क ३ । मूलकरणीनां यथाक्रमं न्यासः—क ६ क ३ क २ । (आसां वर्गाः क ३६ क ९ क ४ सर्वासां योगः क १२१ रूपकृतौ १२१ विशोधयेत् ।)

तृतीयवर्गस्य न्यासः—रू १७ क १४० क ८४ क ६० क ५६ क ४० क २४ । चतुर्भक्ताः रू १७ क ३५ क २१ क १५ क १४ क १० क ६ । आद्यासन्ने क २१ क १५, हृतिः ३१५, आद्यया भक्ते ९ मूलं[5] ३ इयं करणी क ३ । अनया त एव करण्यौ क २१ क १५ भक्ते जाते करण्यौ क ७ क ५ । पूर्वया सह करणीत्रयं क ७ क ५ क ३ । एभिः खण्डैः (शेष)करण्यो भाज्या[6] इति (शेषकरणीनामधो) न्यस्ते जातं क १४ क १० क ६

क ७ क ५ क ३

(भक्ते लब्धं करणी क २) । यथाक्रमं मूलकरण्यः[7] क ७ क ५ क ३ क २ । आसां वर्गाः क ४९ क २५ क ९ क ४ । सर्वासां[8] योगः क २८९ रूपकृतौ २८९ विशोधयेत् ।

चतुर्थवर्गस्य पूर्ववद् विश्लेष्य चतुर्भक्तकरणीनां न्यासः रू १७ क ३० क १८ क १५ क १२ क १० क ६ क ६ क ५ क ३ क २ । अत्राद्यासन्ने क १८ क १५, हृतिः २७०, आद्यया क ३० (भक्ता) ९, मूलं करणी क ३ । अनया त एव भक्ते जाते क ६ क ५, पूर्वया सह जाताः क ६ क ५ क ३ । शेषकरणीनामधो[9] विन्यस्य जातं क १२ क १० क ६

क ६ क ५ क ३

भक्ते जाता करणी क २ । पूर्वया सह करणीचतुष्टयं क ६ क ५ क ३ क २ । पुनः शेषकरणीनामधो[9] विन्यस्य जातं क ६ क ५ क ३ क २ । भक्ते लब्धं करणी क १ ।

क ६ क ५ क ३ क २

मूलकरणीनां यथाक्रमं न्यासः क ६ क ५ क ३ क २ क १ । एतद्वर्गकरणीयोगं क २८९ रूपकृतेः २८९ विशोधयेत् ।

पञ्चमवर्गस्य चतुर्भक्तस्य न्यासः—रू ६० क ५७६ क २५६ क १४४ क ६४ क ३६ क १६ । आद्यासन्नद्वयहृतिरित्यादिना प्राग्वन्मूलकरण्यः क ३२ क १८ क ८ क २ । एतद्वर्गकरणीयोगं क ३६०० रूपकृतेर्विशोधयेत् ।

---

[1] पुंच । [2] द्विष्ठे १ तरयुतहीनस् । [3] °ण्य ४ । [4] भक्ते क ४ मू २ ।
[5] मूवं । [6] करण्योऽनल्पादिभिर्भाज्या । [7] मूव° । [8] सर्बासां । [9] °करणीनां मध्ये ।

अपि च—

प्रकृतिपुरन्दरनगरसगुणभुजतुल्याश्चतुर्गुणा विद्वन् ।
वर्गे यत्र करण्यः सविश्वरूपाः पदं ब्रूहि ॥ २१ ॥

न्यासः—रू १३ क ८४ क ५६ क २८ क २४ क १२ क ८ । चतुर्भक्ता रू १३ क २१ क १४ क ७ क ६ क ३ क २ । अत्राद्यासन्नहतिरादिहृता मूलं नास्त्यत एकविंशति-षण्मितकरण्यो क २१ क ६ वधे क १२६ चतुर्दशकरण्या क १४ भक्ते जातं ९, अस्य मूलं ३ । इयं करणी क ३ । अनया एकविंशति-षट्करण्यौ भक्ते जातं क ७ क २ । यथाक्रमं न्यासः क ७ क ३ क २ । शेषकरणीनामधो[१] विन्यस्य जातं क ७ क ३ क २ । भक्ते जाता करणी क १ ।
क ७ क ३ क २
मूलकरणीनां यथाक्रमं (न्यासः) क ७ क ३ क २ क १ ।

अथवा एकविंशति-त्रिकरण्योर्घाते क ६३ सप्तकरण्या क ७ भक्ते ९ मूलं करणी क ३, अनया भक्ते करण्यौ क ७ क १ । यथाक्रमं (न्यासः) क ७ क ३ क १ । शेषकरणीनामधो[१] विन्यस्य जातं क १४ क ६ क २ । भक्ते जाता करणी क २ । मूलकरणीनां
क ७ क ३ क १
यथाक्रमं (न्यासः) क ७ क ३ क २ क १ ।

(अथवा) चतुर्दश-द्विकरण्योर्घाते (क) २८, सप्तकरणीभक्ते मूलं करणी क २, त एव तया भक्ते करण्यौ क ७ क १ । यथाक्रमं (न्यासः) क ७ क २ क १ । शेषकरणीनामधो[१] विन्यस्य जातं क २१ क ६ क ३ । भक्ते जाता करणी क ३ । यथाक्रमं
क ७ क २ क १
(न्यासः) क ७ क ३ क २ क १ । इति ।

आचार्येणायं मूलक्रमो विस्तारितः, इदानीमस्माभिर्बालावबोधार्थं सुगमः कृतः । यदि सङ्कलितपदमितखण्डेभ्यो न्यूनाधिकानि (करणीखण्डानि) भवन्ति तदा विश्लेष्य संयोज्य मूलं ग्राह्यम् ।

सूत्रम्—

सङ्कलितपदोत्थितयाऽल्पयाऽब्धिहतयाऽपवर्तनो यासाम् ।[२]
रूपकृतेस्ता शोध्या[३] अपवर्तफलाः करण्यः[४] स्युः ॥ ५१ ॥
शेषविधिना न यदि तास्तदसन्मूलं तदा भवति ।

उदाहरणम्—

वसुरसनेत्रप्रमिता यत्र करण्यश्चतुर्गणा वर्गे[५] ।
युक्ता रूपैर्दशभिस्तत्र पदं ब्रूहि मे गणक ॥ २२ ॥

---

१ °णीनां मध्ये । २ °वर्त्तोर्यासां । ३ विशोध्या । ४ °ण्याः । ५ °ण्यचतुर्गुणाः वर्गः ।

न्यासः—रू १० क ३२ क २४ क ८ ।

अत्र सङ्कलितपदस्य करणीखण्डद्वयस्य तुल्यानि रूपाण्यपास्य मूलं ग्राह्यं पुनरेकस्य एवं क्रियमाणे मूलं नास्त्यतोऽस्यकरणीगतमूलाभावः ।

अथानियमेन सर्वकरणीतुल्यानि रूपाण्यपास्य मूलं ६ ऊनयुतरूपाणामर्द्धे मूलकरण्यौ क २ क ८ अस्य वर्गोऽयम् रू १८ । अथवा द्वात्रिंशदष्टमितकरण्योर्योगं कृत्वा न्यासः—रू १० क ७२ क २४ । करण्योस्तुल्यानि रूपाणि [1]रूपकृतेरपनीय (मूलं २ ऊनयुतरूपाणामर्द्धे कृते) जाते क ४ क ६ अस्य वर्गः रू १० क ९६ अतोऽसत् ।

उदाहरणम्—

> [2]षष्टिर्द्वापञ्चाशद् द्वादश करणीत्रयं कृतौ यत्र ।
> दशभी रूपैर्युक्तं[3] तत्र सखे किं पदं ब्रूहि ॥ २३ ॥

(न्यासः) रू १० क ६० क ५२ क १२ ।

अत्र सङ्कलितपदमितस्य करणीद्वयस्यास्य क ५२ क १२ करण्यास्तुल्यानि रूपाण्यपास्य मूलं ६, अतो जाते करण्यौ क २ क ८, अल्पयाऽनया क २ चतुर्गुणया क ८ द्विपञ्चा(शद्)-द्वादशमितयोरपवर्तनं न स्यादतस्ते न शोधितव्ये ।

यत् उक्तं "सङ्कलितपदोत्थितयाऽल्पया चतुर्गुणये"ति अत्राल्पयेत्युपलक्षणं तेन क्वचिन्महत्याऽपि ।

उदाहरणम्—

> तिथिमनुनयनकरण्यश्चतुर्गुणा[4] रूपदशकसंयुक्ताः ।
> किं मूलं ब्रूहि सखे करणीगणिते श्रमोऽस्ति यदि ॥ २४ ॥

न्यासः—रू १० क ६० क ५६ क ८ ।

अत्र करणीखण्डद्वयादस्मात् क ५६ क ८ उत्पन्ने करण्यौ[5] क २ क ८ । अल्पया चतुर्गुणया क ८ अनयाऽपवर्ते कृते लब्धकरण्यौ क ७ क १ । यथाक्रमं क ७ क २ क १ । शेष-विधिना उत्पन्ने करणीखण्डे क ३ क ५ । यथाक्रमं क ५ क ३ क २ । एताः पूर्वकरणी-खण्डैरेभिः क ७ क २ क १ तुल्या न स्युरित्यसत् ।

---

[1] रूपकृतेरानीय जाते रू २ क ६ ।
[2] षष्ठिर्द्विप॰ ।
[3] रूपैयुक्तं ।
[4] ॰चतुगु॰ ।
[5] करण्येते ।

उदाहरणम्—

तिथिमनुरविविश्वककुभ्नगसङ्ख्याः कृतहताः करण्यश्चेत् ।
षोडशरूपसमेता यत्र कृतौ तत्र किं पदं कथय ।। २५ ।।

न्यासः—रू १६ क ६० क ५६ क ४८ क ५२ क ४० क २८ ।

अत्र सङ्कलित (पदमितकरणी) खण्डत्रयस्यास्य क ५६ क ५२ क ४८ पश्चात् खण्ड-द्वयस्यास्य क ६० क २८ पश्चादस्यैकस्य क ४० तुल्यानि रूपाणि अपास्येत्यादिना मूलकरण्यः क १० क ३ क २ क १ । अथवा आदौ खण्डत्रयं पश्चात् खण्डद्वयं पश्चादेकमिति नियमः कः, आदावेवैकं[1] क ६० पश्चाद् द्वे एते क ५६ क ४८ पश्चात् त्रीणि एतानि क ५२ क ४० क २८ तुल्यानि[2] रूपाणि (अपास्य) इत्यादिना खण्डान्युत्पन्नानि क १० क ३ क २ क १ एवमतो मूलमेतदिति[3] । एवं करण्य एता एताश्चेत्[4] अस्य वर्गः रू १६ क १२० क ८० क ४० क २४ क १२ क ८ अयमुदाहृतो वर्गः स्यात् अतोऽसत् । वर्गराशिमूले गृहीते तन्मूलस्य वर्गः पूर्ववर्गतुल्यो न चेत् तन्मूलमसदिति ।

(अत्र) सर्वत्र करणीनामासन्नमूलकरणेन मूलान्यानीय रूपेषु प्रक्षिप्य मूलं वाच्यम् ।

सूत्रम्—

वर्गे क्षयात्मिका चेत्तामपि करणीं धनात्मिका[5] कृत्वा ।
मूलं ग्राह्यं (च) तयोः क्षयात्मिकैका भवत्येव ।। ५२ ।।

पूर्वोक्तक्षयात्मकवर्गस्य मूलार्थं न्यासः—रू ८ क ६०̇ । अत्रर्णकरणीं धनात्मिकां कृत्वा न्यासः—रू ८ क ६० । प्राग्वन्मूलं क ५ क ३ । एतयोरेका ऋणं क ५ क ३̇ वा क ५̇ क ३ ।

द्वितीयस्य न्यासः[6]—रू १० क ६०̇ क ४०̇ क २४̇ । अत्रर्णकरण्यौ धनं प्रकल्प्य प्राग्वन्मूलकरण्यः क ५ क ३ क २̇ वा क ५̇ क ३̇ क २ । अथवा त्रिमितकरण्यां ऋणं कल्पितायां क ५ क ३̇ क २ अस्य वर्गः रू १० क ६०̇ क ४० क २४̇ एष वर्ग उद्दिष्ट-समो न स्यात् तन्मूलमतोऽसत् । उद्दिष्टवर्गराशेर्मूलराशिवर्गो यथा समः स्यात्तथा धनर्णं[7] कल्प्यम् ।

इति करणीषड्विधम् ।

तदेवं षट्त्रिंशत्परिकर्माणि समाप्तानि ।

---

[1] आदायेकं । [2] क ५२ क ४८ तुल्यानि । [3] °मैत° । [4] एवं करण्यते चेत् ।
[5] क्षयात्मिका चित्तामपि धनात्मिकी । [6] निवासः । [7] धनर्णं ।

(२) कुट्टकः

अथ कुट्टके सूत्रम्—

भाज्यो हारः क्षेपः[१] केनाप्यपवर्त्यं कुट्टकस्यार्थम् ।
येन विभाज्यच्छेदौ (छिन्नौ) क्षेपो[२] न तेन खिलम् ॥ ५३ ॥

हरभाज्ययोर्विहृतयोरन्योन्यं यो भवेद् ययोः शेषः ।
स तयोरपवर्तनकृत् (तौ) तेनैवापवर्तितौ तु दृढौ ॥ ५४ ॥

दृढभाज्यहरौ विभजेत् परस्परं यावदेकमवशेषम् ।
विन्यस्याधोऽधस्तात् फलानि तदधस्तथा क्षेपम्[३] ॥ ५५ ॥

तदधः खमुपान्त्येनाहते[४] निजोर्ध्वेऽन्तिमेन[५] संयुक्ते ।
अन्त्यं जह्यादेवं यावद्राशिद्वयं भवति ॥ ५६ ॥

हरभाज्याभ्यां तष्टावधरोर्ध्वौ ते क्रमेण गुणलब्धी[६] ।
यदि लब्धयः समाः स्युस्तदा[७] गुणाप्ती यथागते भवतः ॥ ५७ ॥

विषमाश्चेत् ते शोध्ये गुणलब्धी स्वस्वतक्षणाच्छेषे[८] ।
योगभवे गुणलब्धी निजतक्षणतो विशोधिते क्षयजे[९] ॥ ५८ ॥

इष्टघ्नतक्षणयुते बहुधा भवतो गुणाप्ती ते ।
सर्वत्र कुट्टकविधौ कार्यं समतक्षणं सुधिया ॥ ५९ ॥

उदाहरणम्—

राशिस्त्रिसप्ततियुतेन शतद्वयेन
निघ्नो नवोनितशतेन युतश्च कोऽपि ।
भागं प्रयच्छति[१०] विशुद्धमगाब्धिनेत्रै-
र्भक्तः[११] सखे कथय तं गुणकं फलं मे ॥ २६ ॥

न्यासः—भा २७३ क्षे ९१ ह २४७ । अत्र[१२] "हरभाज्ययोर्विहृतयोरन्योन्यमि" ति भाज्यो २७३ हारेण २४७ भक्तः शेषं २६, अनेन हारो २४७ भक्तः शेषं १३, (अनेन पूर्व-

---

१ हारः क्षेपकः । २ विभंज्य छेदौ छेपो । ३ आक्षेपं । ४ °पात्येन° ।
५ °र्ध्वेतिमे° । ६ वब्धी । ७ लब्धयः समास्युस्तदा ।
८ स्वतक्षणाच्छेषे । ९ क्षेपजे । १० श्यछति । ११ भक्तैः ।
१२ अप्र ।

शेषं २६ भक्तं शुध्यति ततोऽपवर्तनराशिः १३।) अनेन भाज्यहारक्षेपानपवर्त्य जाता दृढा[१] भा २१ क्षे ७ ह १९। दृढभाज्यभाजकयोः परस्परं भक्तयोः फलान्यधोऽधस्तदधः क्षेपं तदधः खं विन्यस्य जाता वल्ली[२] १ ९ ७ ० उपान्तिमेन ७ स्वोर्ध्वे[३] ९ (हते ६३) अन्त्येन (०) युते जातं १ ६३ ७ । पुनरुपान्तिमेन ६३ स्वोर्ध्वे १ हते ६३ अन्त्येन ७ युते ७० जातं राशिद्वयम् ७० ६३। अधरोर्ध्वौ तौ ६३।७० दृढहारभाज्याभ्यां १९।२१ तष्टौ जातौ ६।७। समा लब्धय[४] अत एव (एते) एव गुणाप्ती ६।७। "इष्टघ्नतक्षणयुत"[६] इति एकेन इष्टेन गुणाप्ती २५।२८ द्विकेन वा[७] ४४।४९ त्रिकेण वा ६३।७० एवं बहुधा।

सूत्रम्—

> हारक्षेपकयोर्वा[८] प्रक्षेपकभाज्ययोस्तदुभयोर्वा।
> अपवर्तितयोर्गुणको लब्धिश्च स्वापवर्तहते[९] ॥ ६० ॥

उदाहरणम्—

> येनाभिहताऽशीतिः समन्विता त्रिंशता च वियुता[१०] वा।
> त्रिगुणत्रयोदशाप्ता शुध्यति तं कथय पृथगाप्तिम् ॥ २७ ॥

न्यासः—भा ८० क्षे ३० ह ३९। प्राग्वज्जाते गुणाप्ती २४।५०।

अथवा भाज्यक्षेपौ दशभिरपवर्तितौ भा ८ क्षे ३ हा ३९ प्राग्वज्जाता वल्ली ० ५ १ ३ ० । जातं राशिद्वयम् ३ १५ । (गुणाप्ती १५। ३)। लब्धयो विषमा अतः स्वतक्षणाभ्यामाभ्यां ३९।८ विशोधिते जाते धनक्षेपजे (गुणाप्ती) २४।५। लब्धिः स्वापवर्तनेन दशभिर्गुणिता जाते त एव गुणाप्ती २४।५०।

अथवा हारक्षेपौ[११] त्रिभिरपवर्तितौ भा ८० क्षे १० ह १३। (प्राग्वत्) जाते (गुणाप्ती) ८।५०। गुणकस्त्रिभिरपवर्तनेन गुणितो जाते गुणाप्ती त एव २४।५०।

अथवा भाज्यक्षेपौ दशभिरपवर्त्य हारक्षेपौ त्रिभिरपवर्तितौ भा ८ क्षे १ ह १३। (प्राग्वत्) जातं राशिद्वयम् ३ ५। (गुणाप्ती ५।३) लब्धयो विषमा अतः स्वतक्षणाभ्यां १३।८ शोधिते जाते ८।५। हरक्षेप-भाज्यक्षेपापवर्तनाभ्यां[१२] ३।१० आभ्यां क्रमेण गुणिते जाते त एव गुणाप्ती २४।५०। प्राग्वदेकेन इष्टेन जाते ६३ । १३० द्विकेन वा १०२।२१० एवमनेकधा।

---

[१] जातौ दृढौ। [२] वल्ली ९७०। [३] स्वोर्ध्ये। [४] अधरोर्ध्वौ। [५] लब्ध्य। [६] °घ्नुत। [७] या ४४।४८९। [८] हर°। [९] °हता। [१०] विद्युता। [११] भाज्यक्षेपौ। [१२] °क्षेपावर्तने।

द्वितीयोदाहरणे न्यासः—भा ८० क्षे ३० ह ३६। जाते योगजे गुणाप्ती २४ । ५० । एते स्वतक्षणाभ्यां शुद्धे (जाते) वियोगजे (गुणाप्ती) १५ । ३० । एकेनेष्टेन जाते गुणाप्ती ५४ । ११० द्विकेन ६३ । १६० एवमिष्टवशादनेकधा ।

उदाहरणम्—

को राशिः पञ्चभिः क्षुण्णः सप्तत्रिंशत्समन्वितः[१] ।
वर्जितो वा त्रिभिर्भक्तो निरग्रः स्याद् वदाशु[२] तम् ॥ २८ ॥

न्यासः—भा ५ क्षे ३७ ह ३ । जाता वल्ली $\begin{matrix}१\\१\\३७\\०\end{matrix}$ । राशिद्वयं $\begin{matrix}७४\\३७\end{matrix}$ । अधःस्थिते[३] राशौ त्रिभिस्तष्टे द्वादश लभ्यन्ते, ऊर्ध्वस्थिते राशौ पञ्चभिस्तष्टे चतुर्दश[४] लभ्यन्ते । असमा न ग्राह्याः "कार्यं समतक्षणमि"ति द्वादशसु गृहीतेषु जाते गुणाप्ती १ । १४ चतुर्दशसु[५] गृहीतेषु जाते गुणाप्ती ५ । ४ । "समतक्षणमि"त्युपचारः यथेष्टघ्नतक्षणयुतेन बहुधा भवतो गुणाप्ती तथेष्टघ्नतक्षणवियुते राशिद्वये बहुधा गुणाप्ती भवतः । ऋणक्षेपे द्वादशफले गृहीते गुणाप्ती २ । ६ चतर्दशफले गृहीते जाते गुणाप्ती ८ । १ । इत्यादि ।

सूत्रम्—

हरतष्टे धनक्षेपे लब्धिस्तक्षणफलेन संयुक्ता ।
क्षयगे क्षेपे तक्षणफलोनिते[६] जायते लब्धिः ॥ ६१ ॥

हरतष्टभाज्यराशौ तष्टफलघ्नगुणसंयुता लब्धिः ।

उदाहरणम्—

को राशिः खाभ्रदिङ्निघ्नो दिगश्विनयनैर्युतः[७] ।
हीनो वाऽग्नीन्द्रसम्भक्तः शुध्यति ब्रूहि तं पृथक् ॥ २९ ॥

न्यासः—भा १००० क्षे २२१० ह १४३ । अतः प्राग्वज्जाते गुणाप्ती ६५ । ४७० । (अथवा) भाज्ये हरेण तष्टे जातं भा १४२ क्षे २२१० ह १४३ । अतः प्राग्वज्जाते गुणाप्ती ६५ । ८० । भाज्यतक्षणफलं ६ गुणः ६५ अनयोर्घात[८] ३६० युता जाता लब्धिः[९] सैव ४७० । अथवा हरतष्टे क्षेपे न्यासः[१०] भा १००० क्षे ६५ ह १४३ । जाते गुणाप्ती ६५ ।

---

१ सप्तत्रिंशतिसंयुतः । २ वदाश्रु । ३ अध स्थिते । ४ चतुर्द्दश ।
५ चर्तुर्द्द० । ६ ०निता । ७ ०नैयुतः । ८ अनयोगतिः ।
९ युतो जाता लब्धि । १० यथा ।

४५५ । क्षेप[1]तक्षणलब्ध्या १५ युता जाता लब्धिः सैव ४७० । अथवा भाज्यक्षेपयोर्हरतष्ट-योर्न्यासः[2] भा १४२ क्षे ६५ ह १४३ । जाते गुणाप्ती ६५ । ६५ । भाज्यतक्षणफलं ६ गुणः ६५ अनयोर्हतिः ३९० क्षेपतक्षणफलं १५ अनयोर्योगः ४०५ अनेन लब्धिः[3] ६५ युता जाता सैव ४७० ।

द्वितीयस्य न्यासः—भा १००० क्षे २२१० ह १४३ । जाते प्राग्वद् गुणाप्ती ७८ । ५३० । हरतष्टक्षेपे भा १००० क्षे ६५ ह १४३ । जाते गुणाप्ती ७८ । ५४५ । क्षेप-तक्षणफलोना जाता लब्धिः सैव ५३० ।

सूत्रम्—

क्षयभाज्ये गुणलब्धी धनवत्साध्ये तु भाज्यतः क्षेपे ।
अल्पे तयोः[4] क्षयं स्यादेकमनल्पे तु ते सकृद्धनगे ॥ ६२ ॥

उदाहरणम्—

क्षयत्रिंशद्गुणो राशिस्त्रिभिर्युक्तोऽथवोनितः ।
सम्भक्तो[5] निरग्रः स्यात्तं[6] गुणं वद वेत्सि चेत् ॥ ३० ॥

न्यासः—भा ३० क्षे ३ ह ७ । भाज्यं धनं प्रकल्प्य धनभाज्ये धनक्षेपे गुणाप्ती २ । ९ । एते[7] स्वतक्षणाभ्यामाभ्यां ७ । ३० शोधिते जाते (धनभाज्ये ऋणक्षेपे गुणाप्ती ५ । २१) । ऋणभाज्ये धनक्षेपे (तयोरेकमृणमिति) गुणाप्ती (२ । ९ वा) ५ । २१ । (एवं ऋणभाज्ये ऋणक्षेपे गुणाप्ती २ । ९ वा ५ । २१ ।)[8]

अपि च—

क्षयत्रिंशद्गुणः[9] सप्तनवत्या संयुतोनितः[10] ।
सप्ताप्तः शुद्धिमायाति तं गुणं वद मे द्रुतम्[11] ॥ ३१ ॥

न्यासः—भा ३० क्षे ९७ ह ७ । "धनवत्साध्ये" इति[12] प्राग्वज्जाते गुणाप्ती ४ । ३१ । एतयोरेकमृणमिति लब्धिमृणं प्रकल्प्य ऋणभाज्ये ऋणक्षेपे गुणाप्ती ४ । ३१ । एते स्वतक्षणाभ्यामाभ्यां ७ । ३० शोधिते जाते ऋणभाज्ये धनक्षेपे (गुणाप्ती) ३ । १ ।

क्षयगे हरेऽप्येवमूह्यम्[13] ।

---

[1] क्षेत्र । [2] °पयार्हरतष्टयो न्यासः । [3] लब्धि । [4] तयो । [5] समभ° । [6] स्यात्त । [7] २ । ९९ ते । [8] एतयोरेकमृणं ५ । २१ वा ५ । २१ । [9] क्षयस्त्रिंशद्गुणः । [10] संयुतोथवा । [11] द्रुतं । [12] साध्येति । [13] °मुह्यं ।

सूत्रम्—

हरहृतशुद्धे क्षेपे शून्ये जातेऽथवा गुण: खं स्यात्[१] ।
शून्ये तु भाज्यराशौ हारहृत:[२] क्षेपको लब्धि: ॥ ६३ ॥

उदाहरणम्—

को राशि: सप्तहृतो नवभिर्युक्तोऽथवोनित: शुद्धम् ।
त्रिभिरुद्धृत:[३] प्रयच्छति भागं तं गुणकमाचक्ष्व ॥ ३२ ॥

न्यास:—भा ७ क्षे ९ हृ ३ । जाते गुणाप्ती ० । ३ एकेनेष्टेन ३ । १० द्विकेन ६ । १७ ।

नवशुद्धौ गुणाप्ती ३ । ४ एकेनेष्टेन ६ । ११ द्विकेन ९ । १८ ।

अपि च—

को राशिर्नवगुणित: शून्ययुत:[४] पञ्चभिर्हृत:[५] शुद्धिम् ।
गच्छति[६] तं द्राग्राशिं गणकवर[७] ब्रूहि त्वं[८] यदि वेत्सि ॥ ३३ ॥

न्यास:—भा ९ क्षे ० हृ ५ । जाते गुणाप्ती ० । ० एकेनेष्टेन ५ । ९ द्विकेन १० । १८ ।

अपि च—

को राशि: शून्यहृतो द्वादशयुक्तो विवर्जितो वाऽपि ।
चतुरुद्धृतो विशुध्यति तं गुणकं[९] गणक मे कथय ॥ ३४ ॥

न्यास:—भा ० क्षे १२ हृ ४ । जाते द्वादशक्षेपे गुणाप्ती ० । ३ । एकेनेष्टेन ४ । ३ । द्विकेन ८ । ३ । द्वादशशुद्धौ जाते ४ । ३̇ एकेनेष्टेन ८ । ३ द्विकेन १२ । ३̇ । भाज्ये शून्ये[१०] लब्धि: एवं सर्वत्रापि (अविकृतैव) ।

सूत्रम्—

क्षेपं शुद्धिं[११] रूपं परिकल्प्य तयो: पृथग्गुणाप्ती ये ।
इष्टक्षेपविशुद्धया हते स्वहरतक्षिते भवत: ॥ ६४ ॥

---

१ स्मात् । २ हरहृत । ३ त्रिभिस्त्वद्धृत: । ४ शुन्य° । ५ पंचभिहृ° । ६ यच्छति । ७ °वरं । ८ तं । ९ गुण । १० शून्य । ११ क्षेपशुद्धि ।

उदाहरणम्—

प्रथमोदाहरणे दृढभाज्यहारौ भा २१ क्षे ७ ह १६ । रूपं क्षेपं प्रकल्प्य न्यासः—भा २१ क्षे १ ह १६ । रूपक्षेपे गुणाप्ती ६ । १० । इष्टसप्तकेन क्षेपेण गुणिते स्वहरतष्टे[१] जाते सप्तक्षेपे गुणाप्ती ६ । ७ । रूपशुद्धौ गुणाप्ती १० । ११ । इष्टसप्तक्षेपहते स्वहरतष्टे जाते सप्तशुद्धौ (गुणाप्ती) १३ । १४ ।

सूत्रम्—

यस्मिन् यस्मिन् कर्मणि यद् यत् परिभाषितं[२] समुदितं च ।
तस्मिन् तस्मिन् कर्मणि त(त्त)त्परिभाषितं भवति ।। ६५ ।।

त्रैराशिके प्रमाणं हारः परिभाषितोऽमितिर्भाज्यः ।
अवशिष्टमृणक्षेपो या लब्धिस्ततप्रमाणं[३] स्यात् ।। ६६ ।।

गुणकस्तु पूर्वशेषं तत्पूर्वं पूर्वमेवमपि ।
अनुपातेच्छायामथ ज्ञातायां[४] तत्फलं वाच्यम् ।। ६७ ।।
यो गुणकः सैवेच्छा[५] या लब्धिस्ततत्फलं[६] भवति ।

उदाहरणम्—

पंगुर्योजनषष्टिमेकसहितामब्दैस्त्रिपञ्चाशता[७]
रिङ्गन् क्रामति[८] योजनानि च कियत्सङ्ख्यानि येनासरत् ।
कालेनाशु वदार्य[९] तत्र घटिकाशेषे भवेद् विंशति-
स्तत्सम्वत्सरमासवासरघटीमानानि[१०] चेच्छां पृथक् ।। ३५ ।।

न्यासः—६१ । ५३ । ० घटिकाशेषं २० । अत्र "घटिकानां षष्टचा[११] दिनमि"ति षष्टिर्भाज्यः[१२] प्रमाणं हरः घटिकाशेषं शुद्धिरिति प्रकल्प्य कुट्टकार्थं न्यासः—भा ६० क्षे २० ह ६१ । (जाते गुणाप्ती ४१ । ४० । लब्धिर्घटिका ४० गुणो दिनशेषं ४१ । "दिनैस्त्रिंशता मास" इति त्रिंशद् भाज्यः प्रमाणं हरो दिनशेषं शुद्धिरिति प्रकल्प्य कुट्टकार्थं न्यासः—भा ३० क्षे ४१ ह ६१ ।) जाते गुणाप्ती ४० । १६ । लब्धिर्दिनानि १६, गुणो मासशेषं ४० । "द्वादशभि-[१३] र्मासैर्वर्ष" मिति द्वादश भाज्यः, प्रमाणं हरो, मासशेषं शुद्धिरिति प्रकल्प्य कुट्टकार्थं[१४] न्यासः

---

[१] °नष्टे । [२] शुध्यतरिभाषितं । [३] अवशिष्टमृणक्षेपलब्धिस्ततप्रमाणं । [४] °तेछायामथज्ञानायां च । [५] °वेछा । [६] °ततफलं । [७] षष्ठिमेकसहिता-मब्दैमब्दैस्त्रिपंचशिता । [८] क्रमति । [९] °नाश्रु विदा° । [१०] यानानि । [११] षष्ठ्या । [१२] षष्ठिर्भाज्य । [१३] °दस° । [१४] °र्थं ।

भा १२ क्षे[१] ४० ह ६१ । जाते गुणाप्ती ४४ । ८ । लब्धिर्मासाः ८ गुणो[२] वर्षशेषं ४४ । त्रिपञ्चाशद् भाज्यः, प्रमाणं हरो, वर्षशेषं शुद्धिरिति कुट्टकार्थं न्यासः—भा ५३ क्षे ४४ ह ६१ । जाते गुणाप्ती २५ । २१ । लब्धिर्वर्षाणि २१, गुण इच्छा २५ इति जातं त्रैराशिकम् ६१ । ५३ । २५ । लब्धं वर्षाणि २१ मासाः ८ दिनानि १९ घटिकाः ४० घटिकाभागाः २०/६१ । एवं (सर्वत्र सुधिया) ऊह्यम् ।

भिन्नकुट्टके[३] सूत्रम्—

> ईप्सितलब्ध्या हारे[४] गुणिते क्षेपोनिते च भाज्याप्ते ।
> गुणकारः स्याददृढे दृढेऽपि[५] वा कुट्टके[६] भवति ॥ ६८ ॥

उदाहरणम्—

> कश्चित् त्रिंशद्गुणितो दशसंयुतो[७] द्वादशोद्धृतो यत्र ।
> यच्छति शुद्धं भागं कुट्टकगणितज्ञ[८] तं कथय ॥ ३६ ॥

न्यासः—भा ३० क्षे १० ह १२ । एकेनेष्टेन जाते गुणाप्ती[९] १/१५ । १ द्विकेन ७/१५ । २ त्रिकेण १३/१५ । ३ । एवमिष्टवशादनेकधा[१०] ।

(अपि च—)

> कुट्टकप्रभवाभावेऽप्यभिन्नलब्ध्या[११] सदा गुणो न स्यात् ।
> कुट्टकप्राप्तिभावे[१२]ऽभीष्टवशात्कदाचिदभिन्नः ॥ ६९ ॥

यत् किञ्चित् कुट्टककौशल्यं तत्[१३] पुरतोऽनेकवर्णसमीकरणे वक्ष्ये ।

इति कुट्टकः ।

---

[१] क्षे १९ । [२] गुणे । [३] °कुट्ट° । [४] इप्सितलब्ध्याहारो । [५] स्याददृढदृढे । [६] कुट्ट° । [७] दशसंयुक्तो । [८] °तज्ज्ञं । [९] गुणाप्ती ५ । २ । [१०] ध्ऽव° । [११] कुट्टकाप्रभावेभावेप्यभिन्नकल्पितलब्ध्या । [१२] कुट्टक° । [१३] कुट्टककौशल्यात् ।

Note—It is to be noted that Sūtras 69 and 70 above are not included in the treatment of this subject in the *Gaṇita kaumudī*. On the other hand, between Sūtras 64 and 65 above, there occurs in the *Gaṇita-kaumudī* a set of four Sūtras followed by six examples dealing with the residual and conjunct pulverizers (*sāgra-kuṭṭaka* and *saṁśliṣṭa-kuṭṭaka*).

(३) वर्गप्रकृतिः

वर्गप्रकृतौ सूत्रमार्यासप्तकम्—

ह्रस्वमभीष्टं[१] मूलं तद्वर्गः प्रकृतिसङ्गुणो युक्तः ।
हीनो वा येन कृतिः स्यात्तस्मा(त्त)त्पदं ज्येष्ठम् ॥ ७० ॥

ह्रस्वज्येष्ठक्षेपान्[२] क्रमशस्तेषामधो न्यसेत्तांस्तु[३] ।
अन्यान्येषां[४] न्यासस्तस्य भवेद् भावना नाम ॥ ७१ ॥

वज्राभ्यासौ[५] ह्रस्वज्येष्ठ(क)योः संयुतिर्भवेद्ध्रस्वम् ।
लघुघातः प्रकृतिहतो ज्येष्ठवधेनान्वितो ज्येष्ठम् ॥ ७२ ॥

क्षिप्त्योर्घातः क्षेपः स्याद् वज्राभ्यासयो[६]र्विशेषो वा ।
ह्रस्वं लघ्वोर्घातः प्रकृतिघ्नो ज्येष्ठयोश्च वधः ॥ ७३ ॥

तद्विवरं ज्येष्ठपदं क्षेपः[७] क्षिप्त्योः प्रजायते घातः ।
ईप्सितवर्गविहृतः[८] क्षेपः क्षेपः[९] पदे तदिष्टाप्ते ॥ ७४ ॥

गुणिते वा तन्मूले गुणिते मूले तदा भवतः ।
इष्टकृतिगुणकशेषोद्धृतं तदिष्टं द्विसंगुणं भवति ॥ ७५ ॥

ह्रस्वं मूलं च ततो रूपक्षेपेण साधयेज्ज्येष्ठम्[१०] ।
तुल्यातुल्यपदानां भावनयाऽनन्तमूलानि ॥ ७६ ॥

उदाहरणम्—

अष्टाहता[११] यस्य कृतिः सरूपा
स्यान्मूलदा ब्रूहि सखे तमाशु ।
एकादशघ्ना यदि वा कृतिः का
वर्गत्वमेत्येकयुता विचिन्त्य ॥ ३७ ॥

न्यासः—प्रकृतिः ८ क्षेपकः १ । अत्राभीष्टं ह्रस्वं मूलं कल्पितं १ । अस्य वर्गः १ प्रकृतिगुणः ८ रूपयुतः ९ मूलं ३ एतज्ज्येष्ठमूलं ३ । क्रमेण न्यासः—क १ ज्ये ३ क्षे १ । एषामधस्तान्न्यसेदिति भावनार्थं न्यासः—

प्र ८ क १ ज्ये ३ क्षे १
क १ ज्ये ३ क्षे १

---

१ °भीष्ट । २ °क्षेपाः । ३ न्यसेत्ते तु । ४ अन्यांश्चैषां । ५ °भ्यासो । ६ स्याद्वित्राभ्या° । ७ क्षेप । ८ इप्सितवर्गाविहृतः । ९ क्षेपे । १० °येज्ये° । ११ °हत ।

"वज्राभ्यासौ[१] ह्रस्वज्येष्ठयोः[२] संयुतिर्भवेद्ध्रस्वमि"ति[३] प्रथमकनिष्ठ-द्वितीयज्येष्ठयोरभ्यासः ३,- प्रथमज्येष्ठ-द्वितीयकनिष्ठयोरभ्यासः ३, अनयोर्युतिः ६, ह्रस्वं भवेत्। लघुघातः १ प्रकृतिहतः[४] ८ ज्येष्ठघातेन ९ अन्वितः १७ ज्येष्ठपदं भवेत्। क्षिप्त्योर्घातः क्षेपः १। क्रमेण न्यासः—(क ६ ज्ये १७ क्षे १। "तुल्यातुल्यपदानां भावनयाऽनन्तमूलानी" त्यसमभावनार्थं न्यासः)—

प्र ८ क १ ज्ये ३ क्षे १
क ६ ज्ये १७ क्षे १

समासभावनया जाते मूले क ३५ ज्ये ९९ क्षे १। पुनर्भावनार्थं न्यासः—

प्र ८ क १ ज्ये ३ क्षे १
क ३५ ज्ये ९९ क्षे १

समासभावनया[५] जाते मूले क २०४ ज्ये ५७७ क्षे १। एवमनन्तमूलानि।

अथवा कनिष्ठमूलं रूपद्वयं कल्पितं २। अस्य वर्गः ४ प्रकृति ८ हत ३२ श्चतुःक्षेप[६] ४ युतो ३६ मूलं ज्येष्ठं ६। क्रमेण न्यासः—क २ ज्ये ६ क्षे ४। "ईप्सितवर्गविहृतः क्षेप" इति रूपक्षेपार्थं कल्पितमिष्टं रूपद्वयं[७] २, अस्य वर्ग ४ हृतः क्षेपो ४ लब्धः क्षे १ इष्टद्वयेन हृते मूले जाते रूपक्षेपमूले क १ ज्ये ३ क्षे १। एभ्यो भावनाभिस्तान्येव मूलानि भवन्ति।

द्वितीयोदाहरणे न्यासः—प्रकृतिः ११ क्षेपकः १। अत्र रूपमिष्टं कनिष्ठं १। तद्वर्गः १ प्रकृतिगुणो द्विरूपोनो[८] ९ मूलं ज्येष्ठं ३। यथाक्रमं समासभावनार्थं न्यासः—

प्र ११ क १ ज्ये ३ क्षे २̇
क १ ज्ये ३ क्षे २̇

समासभावनया जाते मूले क ६ ज्ये २० क्षे ४। "ईप्सितवर्गविहृत[९]" इति रूपक्षेपे मूले क ३ ज्ये १० क्षे १। अतः समासभावनया जाते मूले क ६० ज्ये १९९ क्षे १।

---

१ वज्राभ्यासो। २ ह्रस्दः°। ३ °द्धस्व°। ४ °हत।
५ अत्र तुल्यभा°। ६ चतु क्षेप ४। ७ °द्वय। ८ द्विरुपनो।
९ इप्सितवर्गविहृत।

अथवा रूपपञ्चकक्षेपमूले क १ ज्ये ४ क्षे ५। समासभावनया जाते पञ्चविंशतिक्षेपमूले क ८ ज्ये २७ क्षे २५। अतो रूप(क्षेप)मूले क $\frac{८}{५}$ ज्ये $\frac{२७}{५}$। अनयोः[१] पूर्वमूलाभ्यामाभ्यां ३। १० सह भावनार्थं न्यासः—

प्र ११ क ३ ज्ये १० क्षे १
क $\frac{८}{५}$ ज्ये $\frac{२७}{५}$ क्षे १

समासभावनया जाते मूले[२] $\frac{१६१}{५}$। $\frac{५३४}{५}$। एवमनन्तमूलानि। अथवा "वज्राभ्यासयोर्विशेष" इति भावनार्थं न्यासः—

प्र ११ क ३ ज्ये १० क्षे १
क $\frac{८}{५}$ ज्ये $\frac{२७}{५}$ क्षे १

अन्तरभावनया जाते मूले $\frac{१}{५}$। $\frac{६}{५}$। अनयोः[३] पूर्वमूलाभ्यामाभ्यां ३। १० विशेषभावनया जाते मूले $\frac{८}{५}$। $\frac{२७}{५}$। एवमनन्तमूलानि।

"इष्टकृतिगुणकशेषोद्धृतमि"ति रूपक्षेपपदाभ्यां पुनः पुनः समासविशेषभावनाभिर्बहूनि[४] मूलानि भवन्ति। तद्यथा—प्रथमोदाहरणे रूपत्रयमिष्टं[५] प्रकल्प्य यथोक्तकरणेन जातं कनिष्ठं (६)। अस्य वर्गात्प्रकृतिगुणाद्रूपयुतान्मूलं ज्येष्ठं[६] १७। रूपपञ्चकेष्टेन जातं कनिष्ठं $\frac{१०}{१७}$। अतो ज्येष्ठं $\frac{३३}{१७}$। अनयोः[७] पूर्वमूलाभ्यामाभ्यां ६। १७ समासभावनया जाते मूले $\frac{३६८}{१७}$। $\frac{१०४१}{१७}$। अथवा विशेषभावनया जाते मूले $\frac{२८}{१७}$। $\frac{८१}{१७}$। एवं द्वितीयोदाहरणे रूपत्रयेणेष्टेन[८] जाते मूले ३। १०। पञ्चकेनेष्टेन जाते (मूले) $\frac{५}{७}$। $\frac{१८}{७}$। अनयोः पूर्वमूलाभ्यामाभ्यां[९] ३। १० समासभावनया जाते मूले $\frac{१०४}{७}$। $\frac{३४५}{७}$। अन्तरभावनया जाते मूले $\frac{४}{७}$। $\frac{१५}{७}$। एवमनंतमूलानि।

इति वर्गप्रकृतिः।

चक्रवालम्

एकद्विचतुःक्षेपसाधनाय[१०] चक्रवाले करणसूत्रमार्याचतुष्टयम्[११]—

ह्रस्वज्येष्ठक्षेपान् भाज्यप्रक्षेपभाजकान् कृत्वा।
कल्प्यो गुणो यथा तद्वर्गात् संशोधयेत् प्रकृतिम्॥ ७७॥

---

१ अनयो। २ मूले १६१। $\frac{५२४}{५}$। ३ अनयो। ४ °भिवहूनि।
५ रुप°। ६ ज्येष्ठं १८। ७ अनयो। ८ रुप°।
९ अनयो पूर्वमूलाभ्यामाभ्या। १० °द्वित्रिचतुःक्षेपसाधनया। ११ °मार्याद्वयम्।

प्रकृतेर्गुणवर्गे[1] वा विशोधिते जायते तु यच्छेषम् ।
तत्[2] क्षेपहृतं क्षेपो गुणवर्गविशोधिते व्यस्तम् ॥ ७८ ॥

लब्धिः कनिष्ठमूलं तन्निजगुणकाहृतं वियुक्तं च ।
पूर्वाल्पपदपरक्षिप्त्योर्घातेन जायते ज्येष्ठम् ॥ ७९ ॥

प्रक्षेपशोधनेष्वप्येकद्विचतुर्व्वभिन्नमूले[3] स्तः ।
द्विचतुःक्षेपपदाभ्यां[4] रूपक्षेपाय भावना कार्या[5] ॥ ८० ॥

उदाहरणम्—

कस्त्र्युत्तरेण गुणितोऽत्र शतेन वर्गः
सैकः कृतित्वमुपयाति वदाऽऽशु तं मे ।
को वा[6] त्रिर्वजितशतेन हृतस्तु वर्गो
रूपान्वितः कृतिगतो[7] भवति प्रचक्ष्व ॥ ३८ ॥

न्यासः—प्रकृतिः १०३ क्षेपकः १ । प्राग्वद्रूपत्रयशुद्धौ मूले क १ ज्ये १० क्षे ३ । अत्र ह्रस्वपदं भाज्यं, ज्येष्ठपदं क्षेपं, क्षेपं हरं[8] प्रकल्प्य कुट्टकार्थं न्यासः—भा १ क्षे १० ह ३ । कुट्टककरणेन लब्धो गुणः सक्षेपः क्षे ३ (गु) २ । क्षेपे ऋणेन[9] त्रयेण गुणिते जातोऽपरो गुणः ११ । अस्य वर्गात् १२१ प्रकृति १०३ मपास्य[10] शेषं १८ क्षेप ३ हृतं जातः क्षेपः ६ । लब्धिः कनिष्ठमूलं ७ । एतन्निजगुणकेन ११ हृतं ७७, पूर्वह्रस्वपदं १ परक्षेपः ६ घातेन ६ वियुक्तं ज्येष्ठं ७१ । ऋणधनमूलयोरुत्तरे कर्मणि क्रियमाणे न विशेषः । तस्मादृणमूलयोर्धनत्वं प्रकल्प्य षट्शोधने प्रकृतिः १०३ क ७ ज्ये ७१ क्षे ६ ।[11] (पुनः) कुट्टकार्थं न्यासः—भा ७ क्षे ७१ ह ६ । जातो गुणः सक्षेपः क्षे ६ गु १ । क्षेपे (ऋणेनैकेन गुणिते जातोऽपरो गुणः ७ । अस्य वर्गं प्रकृतेरपास्य शेषं ५४ "गुणवर्गविशोधिते व्यस्तमि" ति) जातमृणं[12] ५४ क्षेपेण ६ हृतं क्षेपः ९ । लब्धिः[13] कनिष्ठं मूलं २० । एतन्निजगुणकाहृतं १४०, पूर्वह्रस्वपदपरप्रक्षेपघातः ६३ अनेन वियुक्तं जातं ज्येष्ठं २०३ । पुनः प्रकृतिः[14] १०३ क २० ज्ये २०३ क्षे ९ । कुट्टकार्थं न्यासः—भा २० क्षे २०३ ह ९ । जातो गुणः सक्षेपः क्षे ९ गु २ । एकेनेष्टेन जातोऽपरो गुणः ११ । अस्य वर्गात्प्रकृतिमपास्य शेषं १८, क्षेपेण ९ हृतः क्षेपः (२) । लब्धिः कनिष्ठपदं ४७ । एतन्निजगुणकहृतं ५१७, पूर्वाल्पपदं २० परक्षेपः २

---

[1] प्रकृति गुणवर्गो । [2] न । [3] °द्वित्रिचतुष्काभिन्न° [4] द्विचतुः प्रक्षेपाभ्यां ।
[5] विशुद्धा या । [6] व । [7] °प्रकृति । [8] ह्रस्वपदभाज्यं ज्येष्ठपदं क्षेपं हरं क्षेपं ।
[9] क्रमेण । [10] °मयास्य । [11] क ७ ज्ये १ क्षे ६ । [12] क्षेपे ऋणमिति जातमृणं ।
[13] लब्धि । [14] प्रकृति ।

अनयोर्घातेनानेन ४० वियुक्तं जातं ज्येष्ठं ४७७। पुनः प्रकृतिः १०३ क ४७ ज्येष्ठं ४७७ क्षे २।[१] प्रक्षेपशोधनेष्वप्येकद्विचतुर्ष्वभिन्नमूलेषु भावनयेति समासभावनार्थं न्यासः—

प्र १०३ क ४७ ज्ये ४७७ क्षे २
क ४७ ज्ये ४७७ क्षे २

(समासभावनया) जाते चतुःक्षेपमूले क ४४८३८ ज्ये ४५५०५६ क्षे ४। अतो रूपक्षेपमूले क २२४१६ ज्ये[२] २२७५२८ क्षे १।

द्वितीयोदाहरणे प्रकृतिः ६७ क १ ज्ये १० क्षे ३। प्राग्वत्कुट्टकन्यासः—भा १ क्षे १० हृ ३। जातो गुणः सक्षेपः क्षे ३ गु २। धनरूपत्रयेण (इष्टेन) जातो अपरो गुणः ११। अस्य वर्गात्प्रकृतिमपास्य शेषं २४, क्षेपहृतं क्षेपः ८। लब्धिः कनिष्ठमूलं ७। अतो ज्येष्ठं ६६। (एवं) प्र[३] ६७ क ७ ज्ये ६६ क्षे ८। पुनः कुट्टकः भा ७ क्षे ६६ हृ ८। अतो गुणः सक्षेपः क्षे ८ गु ५। धनरूपेणैकेन जातो अपरो गुणः १३। वर्गादस्य १६६ प्रकृतिमपास्य शेषं ७२। क्षेपहृतं क्षेपः ६। लब्धिः कनिष्ठमूलं २०। अतो ज्येष्ठं १६७। (पुनः) प्रकृतिः ९७ क २० ज्ये १६७ क्षे ६। कुट्टककरणेन लब्धो गुणः सक्षेपः क्षे ६ गु ५। धनरूपेण जातो अपरो गुणः १४। अस्य वर्गात्प्रकृतिमपास्य शेषं ६६ क्षेप ६ हृतं क्षेपः ११। लब्धिः कनिष्ठमूलं ५३। अतो ज्येष्ठं ५२२। पुनः प्रकृतिः ६७ क ५३ ज्ये ५२२ क्षे ११। कुट्टकेन जातो गुणः सक्षेपः क्षे ११ गु ८। शून्येन[४] जातो अपरो गुणः ८। अस्य वर्गं प्रकृतेरपास्य शेषं ३३। "गुणवर्गविशोधिते व्यस्तमि"ति जातमृणं ३३ क्षेपहृतं क्षेपः ३ लब्धिः कनिष्ठं ८६। अतो ज्येष्ठं ८४७। पुनः प्रकृतिः ६७ क ८६ ज्ये ८४७ क्षे ३̇। कुट्टकेन जातो गुणः सक्षेपः क्षे ३̇ गु १। ऋणरूपत्रयेण[५] जातो अपरो गुणः १०। अस्य वर्गात्प्रकृतिमपास्य शेषं ३ क्षेपहृतं क्षेपः १̇। लब्धिः कनिष्ठं ५६६̇। अतो ज्येष्ठं ५६०४̇। प्राग्वदृणत्वे धनत्वमिति जाते धनात्मके रूपशुद्धिमूले क ५६६ ज्ये ५६०४ क्षे १। समासभावनया जाते रूपक्षेपमूले क ६३७७३५२ ज्ये ६२८०६६३३।

सूत्रमार्या—

रूपविशुद्धौ प्रकृतिः कृतियोगः स्यान्न चेत् खिलं[६] तु तदा।
अखिलप्रकृतौ प्राग्वत् साध्ये मूलेऽल्पकानल्पे॥ ८१॥

उदाहरणम्—

कस्त्रयोदशनिघ्नश्च वर्गो व्येकः पदप्रदः।
को वर्गं[७] एकषष्टिघ्नो[८] निरेको मूलदो वद॥ ३९॥

---

१ क ४७७ क्षे २। २ क २२४१४ ज्ये २२०५२८। ३ प्रा। ४ शुन्येन। ५ °रुपत्रयेण। ६ न चेतिवलं। ७ वर्णं। ८ °षष्ठि°।

प्रथमोदाहरणे द्विकत्रिकयोर्वर्गयोगः प्रकृतिः १३ । प्राग्वच्चतुःशुद्धौ मूले[१] क १ ज्ये ३ क्षे ४ । अतो रूपशुद्धौ मूले १/२ । ३/२ । अथवा नवशुद्धौ मूले क १ ज्ये २ क्षे ९ । अतो रूप-शुद्धौ १/३ । २/३ । चक्रवालकरणेनाभिन्ने ५ । १८ ।

द्वितीयोदाहरणे (षट्पञ्चकयोर्वर्गयोगः प्रकृतिः ६१ । प्राग्वत्) षट्त्रिंशत्शुद्धौ मूले क १ ज्ये ५ क्षे ३६ । अतो रूपशुद्धौ मूले[२] १/६ । ५/६ । अथवा पञ्चविंशतिशुद्धौ मूले क १ ज्ये ६ क्षे २५ । अतो रूपशुद्धौ मूले १/५ । ६/५ । चक्रवालेनाभिन्ने वा ३८०५ । २९७१८ । एवमनन्त-मूलानि ।

अपि च—

वर्गः पञ्चगुणः कश्चित् चतुर्भिः संयुतः कृतिः ।
षट्त्रिंशताऽथवा युक्तः शतयुक्तोऽथवा भवेत् ॥ ४० ॥

प्रकृतिः ५ क १ ज्ये ३ क्षे ४ । क्षेपो येन गुणितः तन्मूलगुणे कनिष्ठज्येष्ठे तद्गुणक्षेपे मूले भवतः । अतस्त्रिगुणिते षट्त्रिंशत्क्षेपमूले ३ । ९ । पञ्चगुणिते शतक्षेपमूले ५ । १५ । एवं बुद्धिमता विशोधने मूले ज्ञेये ।

सूत्रम्—

प्रकृतिरभीप्सितवर्गोद्धृता यथा शुद्धिमेति यल्लब्धम् ।
कल्प्यो गुणः कनिष्ठं छेदनमूलोद्धृतं[३] भवति ॥ ८२ ॥

उदाहरणम्—

द्वासप्ततिप्रगुणिता कृतिरेकयुक्ता
मूलप्रदा[४] भवति मे वद मित्र शीघ्रम् ।
पञ्चांशकेन गुणितोऽप्यथवा सरूपो
वर्गः कृतित्वमुपयाति सखे विचिन्त्य ॥ ४१ ॥

प्रथमोदाहरणे प्रकृतिः ७२ ईप्सितवर्गेण[५] ९ हृता विशुद्धलब्धं ८ । इयं प्रकृतिः ८ क १ ज्ये ३ क्षे १ । अत्र कनिष्ठं छेदमूलेनानेन ३ हृतं जातं कनिष्ठं[६] १/३ । एवं जाते ह्रस्व-ज्येष्ठे[७] १/३ । ३ ।

द्वितीयोदाहरणे प्रकृतिः ३/५ । इयं पञ्चमांशवर्गेण १/२५ हृता विशुद्धं लब्धं ५ । प्राग्वद् रूपक्षेपमूले क ४ ज्ये ९ क्षे १ । कनिष्ठं छेदमूलेनानेन १/५ हृतं जातं कनिष्ठं २० । एवं जाते ह्रस्वज्येष्ठे[८] २० । ९ । "तुल्यातुल्यपदानां भावनयाऽनन्तमूलानि[९]" ।

---

[१] मुले । [२] मुले । [३] छेदेन° । [४] मुलप्रदा । [५] इप्सितवर्गेण ।
[६] कनिष्ठं ३ । [७] ह्रस्वंज्ये° । [८] ह्रस्वः ज्ये° । [९] °नयान्नत° ।

वर्गगतायां प्रकृतौ सूत्रम्—

> क्षिप्तिरभीष्टविभक्ता द्विधा तदिष्टोनसंयुता[१] दलिता ।
> आद्या[२] प्रकृतिपदाप्ता क्रमशोऽल्पानल्पमूले ते ॥ ८३ ॥

उदाहरणम्—

> वर्गो नवहतः[३] कश्चिद् दशाढ्यो[४] वा दशोनितः ।
> मूलदो जायते तं मे गणितज्ञ वद द्रुतम्[५] ॥ ४२ ॥

प्रकृति ९ क्षे १० । अत्र क्षिप्तिः १० द्विधैकेनेष्टेन हृता १० । १० इष्टेनोनयुता दलिता ९/२ । ११/२ । अनयोराद्या[६] प्रकृतिपदेनानेन ३ हृता जाते मूले ३/२ । ११/२ । द्विकेनेष्टेन मूले १/२ । ७/२ ।

द्वितीयोदाहरणे प्रकृतिः ९ क्षे १० । प्राग्वदेकेनेष्टेन जाते मूले ११/६ । ९/२ । द्विकेन जाते मूले ७/६ । ३/२ । एते धनमूले वा[७] भवतः । ऋणत्वे धनत्वे न विशेषः । एवमनन्तमूलानि[८] । रूपक्षेपपदाभ्यां समासान्तरभावनाभिर्बहूनि मूलान्युत्पद्यन्ते[९] ।

प्रकृतिसमक्षेपविशुद्धावुदाहरणम्—

> का कृतिर्दशभिः क्षुण्णा दशाढ्या वा दशोनिता ।
> मूलदा जायते विद्वन् तां द्रुतं[१०] वद वेत्सि चेत् ॥ ४३ ॥

प्रकृतिः १० क्षेपः १० । अत्र दशशुद्धौ मूले[११] १ । ० । "ह्रस्वमभीष्टं मूलमि"त्यादिना रूपशुद्धौ मूले १ । ३ क्षे १ । पूर्ववत् दशशुद्धौ मूले १ । ० क्षे १० । भावनया जाते दशक्षेपमूले ३ । १० ।

द्वितीयोदाहरणे प्रकृतिः १० क्षे १० । प्राग्वद्दशशुद्धौ मूले १ । ० । "इष्टकृतिगुणकशेषोद्धृतमि"ति[१२] (त्रिकेनेष्टेन) रूपक्षेपमूले ६ । १९ । पूर्वमूलाभ्यामाभ्यां १ । ० समासभावनया[१३] जाते दशशुद्धौ मूले[११] १९ । ६० । अन्तरभावनया त एव मूले १९ । ६० ।

अपि च—

> क्षयगैकादशघ्नः को वर्गः षष्टिसमन्वितः ।
> मूलदो[१४] जायते तं मे[१५] वद कोविद[१६] सत्वरम् ॥ ४४ ॥*

---

[१] °दिष्ठा न° । [२] आद्य । [३] °वहृतः । [४] कश्चिदुशाढ्यो । [५] वदाशु त्वं । [६] अत्रयो° । [७] एव । [८] °मनंतिमू° । [९] °द्यते । [१०] तादृशं । [११] मुले । [१२] ईष्ट° । [१३] सहभावनया । [१४] मूलदा । [१५] तमे । [१६] कोविद्वन् ।

* In place of this example, the *Gaṇita-kaumudī* gives another similar example. See *Gaṇita-kaumudī*, Part II, Ex. 8, pp. 242 243.

न्यासः—प्र ११ क्षे ६० । अत्र "ह्रस्वमभीष्टं मूलमि"त्यादिना षष्टिक्षेपमूले १ । ७ ।

अधुना द्वादशक्षेपमूले १ । १ समासभावनया जाते चतुश्चत्वारिंशदधिकशतक्षेपमूले २ । १० । अतो[1] रूपक्षेपमूले $\frac{१}{६}$ । $\frac{५}{६}$ । ज्येष्ठमूले धनर्णे[2] न विशेषः । धनस्य मूलं धनमृणं वा भवति । परिकर्मसु उक्तवदत्र धनर्णयोरविशेषः । तथा हि—"इष्टकृतिगुणकशेषोद्धृतमि"ति इष्टं[3] रूपं १ अस्य कृतिः[4] १ प्रकृतिर्विशोधिता शेषं १२ । अनेन द्विगुणमिष्टं २ हृतं जातं कनिष्ठं $\frac{१}{६}$, अतो ज्येष्ठं $\frac{५}{६}$ । एवमिष्टवशादनन्तमूलानि ।

तथा हि[5]—

> प्रक्षेपेषु बहुषु (वा) शुद्धिषु वा[6] निजधिया पदे ज्ञेये ।
> रूपक्षेपाय तयोर्भावनयाऽनन्तमूलानि ॥ ८४ ॥
>
> यस्य न बुद्धिः स्वांते न गणितलेशोऽपि तस्य[7] स्यात् ।
> तस्मान्निजया बुद्ध्या समूह्य[8]मखिलं तु गणितमिदम् ॥ ८५ ॥

उदाहरणम्—

> कस्त्रयोदश(सं)निघ्नो वर्गः सप्तदशाधिकः ।
> वर्जितो वा पृथङ्मूलप्रदः[9] स्याद् वद मे द्रुतम्[10] ॥ ४५ ॥

न्यासः—प्रकृतिः १३ क्षे १७ । अत्र रूपत्रयक्षेपमूले १ । ४ क्षे ३ । अत्र बुद्धिः । क्षेपगुणं क्षेपं प्रकल्प्य[11] (न्यासः)—प्र १३ क्षे ५१ । अत्रैकपञ्चाशत्क्षेपमूले १ । ८ क्षे ५१ । अनयोः पूर्वमूलाभ्यां सह भावनार्थं न्यासः—प्र १३ क १ ज्ये ८ क्षे ५१
क १ ज्ये ४ क्षे ३

समासभावनया त्रिपञ्चाशताधिकशतक्षेपमूले[12] १२ । ४५ क्षे १५३ । "ईप्सितवर्गविहृतः क्षेप" इति सप्तदशसंख्यः क्षेपो यथा भवति तथा कल्पितः इष्टः त्रयरूपः (३) (अस्य) वर्गः ९ अनेन हृतः क्षेपः १७ । "पदे तदिष्टाप्ते" इति त्रिहृतमूले सप्तदशक्षेपे क ४ ज्ये १५ क्षे १७ । अन्तरभावनया प्राग्वज्जाते सप्तदशक्षेपमूले क $\frac{४}{३}$ ज्ये $\frac{१६}{३}$ क्षे १७ ।

---

[1] जाते चतुश्चत्वारिंशत्क्षेपमूले २ । १० अतो । [2] धनर्णं । [3] °शेषोद्धृतः × छत × मितीष्टं । [4] कृति । [5] तथाहि रूपमिष्टं १ अस्मात्प्रकृति विशोध्य शेषं १२ अनेन द्विगुणमिस्टं २ हृतं जातं कनिष्ठं ३ वा ज्येष्ठं ३ एवमिष्टवशादानत्यः । [6] बहुत्वा शुद्धषु । [7] बुद्धिः स्वतेन गणितं कलशोपि तस्यं । [8] तस्मान्निजधिया बुद्ध्वा समुह्य° । [9] पृशूलप्रदः । [10] त्रतं । [11] प्रक्षिप्य । [12] त्रिपञ्चाशत्क्षेपमूले ।

द्वितीयोदाहरणे न्यासः—प्र १३ क्षे १७। प्राग्वज्जाते सप्तदशक्षेपमूले (४। १५ क्षे १७। रूपशुद्धिमूलाभ्यामाभ्यां ५। १८ क्षे १ समासभावनया जाते सप्तदशशुद्धौ मूले) १४७। ५३०। अन्तरभावनया जाते ३। १०।

अत्र (अ) मूलराशेरासन्नमूलानयने सूत्रम्—

मूलं ग्राह्यं यस्य च रूपक्षेपजे पदे[1] तत्र।
ज्येष्ठं ह्रस्वपदेन च समुद्धरेन्मूलमासन्नम्[2] ॥ ८६ ॥

उदाहरणम्—

दशानामपि रूपाणां पञ्चमांशस्य वा वद।
आसन्नमूलं जानासि यदीमां प्रकृतिक्रियाम् ॥ ४६ ॥

न्यासः—प्रकृतिः १०। अत्र रूपक्षेपमूले ६। १९ वा २२८। ७२१ वा ८६५८। २७३७९।[3] अल्पेनानल्पमुद्धरेदिति दशानामासन्नमूलं $\frac{१९}{६}$ वा $\frac{७२१}{२२८}$ वा $\frac{२७३७९}{८६५८}$।[4]

द्वितीयस्य न्यासः—प्रकृतिः $\frac{१}{५}$। अत्रेष्टेनानेन $\frac{१}{२}$ प्राग्वद्रूपक्षेपमूले २०। ९ वा ३६०। १६१ वा ६४६०। २८८९।[5] अत आसन्नं पञ्चांशस्य मूलं $\frac{९}{२०}$ वा $\frac{१६१}{३६०}$ वा $\frac{२८८९}{६४६०}$।[6]

इति सकलकलानिधिनरसिंहनन्दन-गणितविद्याचतुरानन-नारायणपण्डितविरचिते बीज-गणितावतंसे वर्गप्रकृतिः समाप्ता।

[समाप्ता बीजक्रिया]

---

[1] पदं। [2] °पदेनोद्धरे°। [3] अत्र क्षेपमूले ६। ९ वा ३२८। ७२१ वा ८६५९। २७३७९। [4] वा ३७३७९। [5] मूले ९। २०। वा ३६०। ३६१ वा ६४५ रूप ६०। २८८९। [6] मूलं $\frac{९}{२०}$ वा $\frac{१६०}{१६१}$ वा $\frac{२८८९}{६४४०}$।

बीजम्[१]

यस्मादेतत्सकलं[२] विश्वमनंतं प्रजायते व्यक्तम् ।
अव्यक्तादपि बीजाच्छिवं[३] च गणितं च तं[४] नौमि ॥ १ ॥

अव्यक्तसमीकरणं वर्णसमत्वं च मध्यमाहरणम् ।
भावितसमत्वमस्मिन् बीजानि वदन्ति चत्वारि ॥ २ ॥

तत्रादौ तावदव्यक्तसाम्ये करणसूत्रमार्यापञ्चकम्—

यावत्तावच्चिह्नितमेकं वा बहुमितं तु परिकल्प्य[५] ।
रूपाढ्यं वा रूपोनितमथवाऽव्यक्तमानमिति ॥ ३ ॥

माने तस्मिन्नेवोद्देशालापवत्[६] समाचरेत्[७] कर्म ।
फलसिद्धयै द्वौ[८] पक्षौ तुल्यौ कार्यौ प्रयत्नेन ॥ ४ ॥

एकस्मादव्यक्तं[९] विशोधयेदन्यतस्तु रूपाणि ।
शेषेणाव्यक्तेन च समुद्धरेद्रूपशेषमिह ॥ ५ ॥

अव्यक्तस्य[१०] च राशेर्मानं व्यक्तं प्रजायते नूनम् ।
अज्ञातेषु बहुषु वा यावत्तावद् द्विकादिसंगुणितम् ॥ ६ ॥

भक्तं रूपैर्युक्तं विवर्जितं वा प्रकल्पयेदेवम् ।
निजबुद्धया विज्ञेयं क्वचिदव्यक्तस्य च मानम् ॥ ७ ॥

यस्मिन्नेको वर्णो वर्तते तदव्यक्तसाम्यं बीजं, यत्र बहवो वर्णा यावत्तावत्कालकादयो वर्तन्ते तदनेकवर्णसाम्यं[११], यत्र च वर्णानां वर्गादिसमीकरणं क्रियते तन्मध्यमाहरणं, यत्राव्यक्तवर्णानां भावितसमीकरणं तद्भावितसमत्वमिति बीजचतुष्टयमाद्याः प्राहुः । तेषु प्रथमे तावदव्यक्तसाम्ये यत्रोदाहरणे योऽज्ञातो राशिस्तन्मानं यावदेकं द्वयादि वा सरूपमरूपं वा रूपैरूनं युतं वा प्रकल्प्य तस्य राशेर्वासनानुसारेणोद्देशकालापवद्योगवियोगगुणनभजनत्रैराशिकपञ्चराशिकश्रेढीक्षेत्रखातादिक्रियया[१२] द्वौ पक्षौ समौ कार्यौ । यस्मिन्नालापे पक्षयोः समत्वं न विद्यते तदेकपक्षः केनचित्संगुणितो भक्तो युतो वर्जितो वा निजबुद्धया पक्षौ समौ कार्यौ ।

---

१ अतः अभृति बीजम् । २ यस्मात्ततसकलं । ३ वीजा छिवं । ४ सदा ।
५ ०मितं रूपरीकल्प्य । ६ तस्मिन्नुवदंशालाएकव ७ तौं । ८ समाहरेत्
९ एकैकस्मा । १० अव्यक्त । ११ तदचेक० । १२ ०रेणोद्देशः काल्यायव० ।

समपक्षयोरेकपक्षाव्यक्तमन्यपक्षाद्विशोध्य अन्यपक्षरूपाणि[१] इतरपक्षरूपेभ्यो विशोध्य[२] तत्र यद्रूपशेषमव्यक्तशेषेण हरेत् । यल्लक्षितं तदेकस्याव्यक्तस्य[३] मानं व्यक्तं तेन कल्पितराशिरुत्थाप्य[४] व्यक्तो राशिः क्रियते । यत्र द्व्यादयोऽव्यक्तराशयो भवन्ति तत्रैकमव्यक्तं शेषं द्व्यादिभिरभीष्टैर्गुणितं भक्तं वा इष्टैः रूपैरूनं युतं वा यावत्तावत्प्रकल्पयेत् । अथवा, एकमव्यक्तं शेषाणि व्यक्तानि मानानि कल्प्यानीति ।

उदाहरणानि—

समानमौल्या वणिजोऽष्टघोटा
एकस्य रूपाणि शतानि षट् च ।
ऋणे[५] शतेऽन्यस्य च वाजिनोऽर्क-
मिताः समौ तौ[६] च किमश्वमूल्यम् ॥ १ ॥

(अपूर्णम्)

---

१ व्यक्तवर्गादिकमपि इतरेपक्षरूपाणि । २ ०रूपेभ्यो पिशोध्य । ३ ०क्तस्व ।
४ राशिरुपाप्य । ५ ऋणं । ६ मिताः स्वस्वौ ।

घोषणा-पत्र

समाचारपत्र-रजिस्ट्रीकरण (केन्द्रीय) नियमावली, १९५६ के नियम ८ (१) के अधीन प्रकाशितव्य स्वामित्व-सम्बन्धी तथा अन्य ब्योरे।

(प्ररूप-चार)

१. प्रकाशन का स्थान — अखिल भारतीय संस्कृत-परिषद्, महात्मा गांधी मार्ग, हजरतगंज, लखनऊ

२. प्रकाशन की कालिकता — षाण्मासिक

३. मुद्रक का
(१) नाम—श्री रामकुमार सिनहा
(२) राष्ट्रिकता—भारतीय
(३) पता—इण्डस्ट्रियल प्रिंटिंग वर्क्स, सुभाषमार्ग, रानीगंज, लखनऊ।

४. प्रकाशक का
(१) नाम—श्री गोपाल चन्द्र सिंह
(२) राष्ट्रिकता—भारतीय
(३) पता—बी० ९८९, सैक्टर ए०, महानगर, लखनऊ।

५. सम्पादक का
(१) नाम—डा० जगदम्बाप्रसाद सिनहा
(१) राष्ट्रिकता—भारतीय
(३) पता—सी० १, न्यू यूनिवर्सिटी स्टाफ फ्लैट्स गोकरन नाथ रोड, लखनऊ।

६. स्वामी का नाम और पता—अखिल भारतीय संस्कृत-परिषद्, महात्मा गांधी मार्ग, हजरतगंज, लखनऊ।
(इसमें कोई हिस्सेदार नहीं है)

मैं, गोपाल चन्द्र सिंह, एतद्द्वारा घोषित करता हूं कि ऊपर दिये हुए ब्योरे मेरे पूर्णतम ज्ञान और विश्वास के अनुसार सत्य हैं।

(ह०) गोपाल चन्द्र सिंह
प्रकाशक (अखिल भारतीय संस्कृत-परिषद्,
लखनऊ की ओर से)

अखिल भारतीय संस्कृत-परिषद्, लखनऊ
के
प्रकाशन

१. सर मोनियर विलियम्सकृत अंग्रेजी-संस्कृत कोश (पुनर्मुद्रित संस्करण) ४५.००

२. Sanskrit First Lessons—Dr. J. R. W. Ballantyne ३.००

३. नलोपाख्यानम् (भूमिका, हिन्दी अनुवाद तथा शब्दकोश सहित) १३.५०

४. नलोपाख्यान-कोश ५.००

५. A Catalogue of Manuscripts in the Akhila Bharatiya Sanskrit Parishad, Lucknow (First Series) [1304 entries] ४०.००

६. वेदान्तपरिभाषा ('भगवती' संस्कृत-व्याख्या सहित) १४.५०

७. संसारसागरमन्थनम् (हिन्दी) भाग १ (चन्द्रकला) २.००
भाग २ (सूर्य का अधोगमन) २.००

८. गोपीनाथ कविराज-अभिनन्दन-ग्रन्थ १००.००

९. A Catalogue of Manuscripts in the Akhila Bharatiya Sanskrit Parishad, Lucknow (Second Series) [4033 entries]
Vol. I ४०.००
Vols. II, III & IV (प्रेस में)

१०. श्रीपतिप्रणीतं धीकोटिदकरणम् (Critically edited Text with Introduction, English Translation, Notes and Illustrative Examples) २.००

११. श्री नारायणपण्डितविरचित: बीजगणितावतंस: (critically edited Text with Introduction) ३.००

१२. Studies in Ancient Indian Seals by Dr. K. K. Thaplyale (प्रेस में)

१३. ऋतुसंहार (भूमिका, हिन्दी अनुवाद तथा विविध परिशिष्टों सहित) (प्रेस में)

१४. अभिनन्दकृत रामचरित—खण्ड १ भूमिका तथा समीक्षात्मक पाठालोचन (प्रेस में)
खण्ड २ हिन्दी अनुवाद (प्रेस में)

Published by :
Akhila Bharatiya Sanskrit Parishad
Mahatma Gandhi Marg, Hazratganj
Phone 23962

Printed by
Industrial Printing Works
273, Raniganj
Phone 26410

LUCKNOW (INDIA)